Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगमोद्धारक-ग्रन्थमालाया एकविंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

आगमोद्धारक-आचार्यप्रवरश्री-आनन्दसागरसूरीश्वरेभ्यो नमः ।

कविवर-पण्डितप्रवर-श्रीमन्मानसागरगणिवर्यविरचितं

# शतार्थ-विवरणम् ।

आ. श्री कैलाससागर सूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा.

卐

संशोधकः

प० पू० गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागर-
सूरीश्वरशिष्यः शतावधानी मुनिलाभसागरः

प्रतय : ५०० ] [ मूल्य १-०० न.पै.

वीर संवत् २४८९ — वि० सं० २०१९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशक :
आगमोद्धारक–ग्रन्थमालाना एक कार्यवाहक
शा. रमणलाल जयचंद
कपडवंज (जि. खेडा)

## द्रव्यसहायक–नामावली

२५०–०० पू. आगमोद्धारक–आचार्यश्री आनन्दसागरसूरीश्वरजी म. नी आज्ञावर्तिनी साध्वीजी श्री पुष्पाश्रीजी म. तेमनी शिष्या साध्वीजी श्री निरंजनाश्रीजी म. ना सदुपदेशथी लालभाई परीखना शकरीबेन जैन उपाश्रयना ज्ञानखाता तरफथी ।

२०१–०० मुनिराज श्री दीपसागरजी म. ना सदुपदेशथी शेठ मणीलाल गुलाबचंद दोशी टंकारावाला, शेठ दलीचंद गुलाबचंद दोशी टंकारावाला ।

मुद्रक :
मंगळभाइ वहेरीभाइ पटेल
मेनेजर
सहकारी छापखानु वडोदरा लि.
रावपुरा, वडोदरा.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगमोद्धारक-ग्रन्थमालाया एकत्रिंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

आगमोद्धारक-आचार्यप्रवरश्री-आनन्दसागरसूरीश्वरेभ्यो नमः ।

कविवर-पण्डितप्रवर-श्रीमन्मानसागरगणिवर्यविरचितं

# शतार्थ-विवरणम् ।

卐

संशोधकः

प० पू० गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागर-सूरीश्वरशिष्यः शतावधानी मुनिलाभसागरः

प्रतय : ५०० | | मूल्य १-०० न. पै.

वीर संवत् २४८९ वि० सं० २०१९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शुद्धिपत्रम्

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | २ | गुरूभ्या | गुरुभ्यो |
| ,, | ८ | समापत | समर्पित |
| २ | १० | दरिद्रो | द रिद्रो |
| ,, | १४ | तरिमन् | तस्मिन् |
| ३ | १० | वकारः | बकारः |
| ४ | १ | सम्बा० | सम्बो० |
| ७ | २ | परमी श्वरी | परमीश्वरी |
| ,, | १८ | ये युः | येयुः |
| ८ | ६ | माप | मपि |
| ९ | ५ | भ | भू |
| ,, | १२ | आत्मगं | आत्मगं कर्तुं |
| ११ | १६ | द | द् |
| १२ | ९ | सु | शु |
| ,, | २१ | अयः | स्वयः |
| १७ | ७ | सु | शु |
| १९ | १ | उत्यिए | उत्थिए |
| २० | ७ | ईस्वरः | ईश्वरः |
| ,, | १२ | सु- | शु- |
| २१ | १६ | सु- | शु- |
| २२ | १३ | सु- | शु- |
| २५ | १२ | विद्यते | विद्येते |
| २५ | १५ | परम | पर |
| २६ | १४ | ग्ना० | मग्ना० |
| २८ | ७ | सहस्र | सहस्र |
| ,, | १७ | सहस्र | सहस्र |
| ३२ | ११ | नौ | नो |
| ३५ | ६ | तत्रस | त्रस |
| ३८ | ६ | शत्रि | शतरि |
| ४३ | १७ | आर | अरि० |
| ४६ | २ | धारणाहापा | धारणोहापो० |
| ५२ | १२ | पूज्यो | पूज्ययो |
| ५३ | १९ | अग | अग् |
| ५८ | १८ | परान | परान् |
| ६६ | ३ | रणा | रणो० |
| ७४ | २२ | द्रोण | द्रोन |
| ७६ | २३ | द्ररिद्रा | दरिद्रो |
| ७७ | ८ | हे प्र | हे प |
| ८३ | २ | इदशः | ईदशः |
| ८५ | १५ | ईनान् | इनान् |
| ९२ | ११ | किचि० | किंचि० |
| ९५ | १३ | रथ | रथैं |
| ९७ | ३ | हरिः | हारः |
| १०४ | ६ | त्वत् | त्वात् |
| १०५ | १४ | हारभ | हारभः |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# किञ्चिद् वक्तव्य ।

जैनशासनरूपमहासागरमां विबुधजनविरचित भिन्नभिन्नविषयना घणा ग्रन्थरत्नो विद्यमान छे। परंतु तेमां अनेकार्थविषयना ग्रन्थरत्नो विरल छे, तेमां पण एक श्लोकना शतार्थवाला ग्रन्थो तो अत्यन्त विरल छे। तेमांनो आ ग्रन्थरत्न छे।

आ ग्रन्थरत्ननुं नाम शतार्थविवरण छे, अने ते दीपकशब्दनी जेम यथार्थ छे। कारणके आ ग्रन्थमां कलिकाल सर्वज्ञश्रीहेमचन्द्राचार्यविरचित योगशास्त्रना प्रकाश २ ना १२ मा 'परिग्रहारम्भ०' श्लोकना एकसो अर्थ करवामां आव्या छे।

आ ग्रन्थरत्नना कर्ता पण्डितप्रवर श्रीमान् मानसागरगणिवर छे। तेमना गुरुवर्य तपागच्छीय कविचक्रचक्रवर्ति–पण्डित श्रीबुद्धिसागर गणिवर छे। आ बाबत आ ग्रन्थनी प्रशस्ति जोवाथी स्पष्ट थाय छे।

आ ग्रन्थनी रचना अकबरनृपप्रतिबोधक आचार्य श्री विजयहीरसूरीश्वरजीना राज्यकालमां करवामां आवी छे। आ बाबत पण प्रशस्ति जोवाथी स्पष्ट छे। आ उपरथी आ ग्रन्थकारनो सत्तासमय श्री विजयहीरसूरीश्वरजीनो सत्तासमय जे १७ मी सदी छे तेज छे।

आ ग्रन्थनुं उत्पत्तिबीज–श्री विजयहीरसूरीश्वरजी महाराजजीए पण्डित श्रीमान् मानसागरगणिवरने परीक्षामाटे योगशास्त्रनो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'परिग्रहारम्भ०' श्लोक आप्यो हतो, पछी तेओश्रीए ते श्लोकना १०० अर्थ करी आप्या. आ प्रमाणे आ ग्रन्थरन्ननी उत्पत्ति थइ छे.

आ ग्रन्थमां २४ जिन–जिनवाणी-शासनदेवी-पञ्चपरमेष्ठि-ब्रह्मा-विष्णु–महेश्वर–पार्वती–लक्ष्मी–सरस्वती–ज्ञान-काम-विजयहीरसूरि विजयसेनसूरि-अकबरनृप-नवग्रह-सुर-८ दिक्पाल–राम–१४ स्वप्न–अने बुद्धिसागरगुरुनुं वर्णन छे।

संशोधनमां त्रण प्रतिओ प्राप्त थइ हती। एक श्री नित्य-विनय-मणि–जीवन पुस्तकालय कलकत्तानी, बीजी जैनानन्दपुस्तकालय सुरतनी, अने त्रीजी साहित्यसंशोधननिष्णात–विद्वद्वर्य मुनिराजश्री पुण्यविजयजी महाराज तरफथी।

तेना आधारे आ ग्रन्थनुं सावधानीथी संशोधन करवामां आव्युं छे, छतां कोइ भूल रहेली जणाय तो सुज्ञोए सुधारी वांचवुं ए अभ्यर्थना।

लि०

संशोधक।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रकाशकीय निवेदन ।

प. पू. गच्छाधिपति आचार्य श्री. माणिक्यसागरसूरीश्वरजी महाराज आदि ठाणा वि. सं. २०१० ना वर्षे कपडवंज शहेरमां मीठाभाई गुलाबचन्दना उपाश्रये चातुर्मास बीराज्या हता। आ अवसरे तेओश्रीना पवित्र आशिर्वादे आगमोद्धारक-ग्रन्थमालानी स्थापना थएली हती. आ ग्रन्थमालाए त्यारबाद प्रकाशनोनी ठीक-ठीक प्रगति करी छे।

तेओश्रीनी पुण्यकृपाए आ 'शतार्थ विवरण' नामना ग्रन्थने आगमोद्धारक ग्रन्थमालाना २१ मा रत्न तरीके प्रगट करतां अमने बहु हर्ष थाय छे.

आनी प्रेस कोपी तथा आनुं संशोधन प. पू. गच्छाधिपति आ. श्री माणिक्यसागरसूरीश्वरजीनी पवित्रदृष्टि नीचे शतावधानी मुनिराजश्री लाभसागरजीए करेल छे. ते बदल तेओश्रीनी तेमज जेओए आना प्रकाशनमां द्रव्य तथा प्रति आपवानी सहाय करी छे ते बधानो आभार मानीए छीए।

लि०

प्रकाशक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीजिनेन्द्रो विजयतेतराम् ।

आगमोद्धारक-आचार्यप्रवरश्रीआनन्दसागरसूरीश्वरसद्गुरुभ्यो नमः।

कविवर पं० श्रीमानसागरगणिकृतं

# शतार्थविवरणम् ।

प्रणम्य परमप्रीत्या पञ्च श्रीपरमेष्ठिनः । परिग्रहारम्भमग्ना इतिश्लोकं विवृणमहे ॥१॥ प्राचीनार्वाचीनाचार्यचक्रचक्रवर्तिभिः श्रीमत्तपागच्छाधिराजैः महामहीपतिवितीर्णविस्तीर्णसन्मानैः श्रीहीरविजयसूरिभिः शतार्थपरीक्षाकृते समापतस्य श्रीयोगशास्त्रद्वितीयप्रकाशस्य द्वादशस्य श्लोकस्य शतार्थीक्रियते । तत्र तावचतुर्विंशतिजिना वर्ण्यन्ते ।

परिग्रहारम्भ ! मग्नास्तारयेयुः कथं परान् ।
स्वयं दरिद्रो न ! परमीश्वरीकर्तुमीश्वरः ॥१॥

व्याख्या-'इंभारंभे गो'रितिनाममालावचनात् आ-समन्तात् रम्भा-गोशद्बो यत्र सः आरम्भः गौरित्यर्थः । परिग्रहवत्-परिवारवत् परिग्रहे-प्रतिमापरिकरे वा आरम्भो-गौर्यस्य सः परिग्रहारम्भः, समर्थविशेषणत्वादादिदेव इत्यर्थः । तस्य सम्बोधनं हे परिग्रहारम्भ-हे आदिदेव ! वृषभलाञ्छनत्वात् । 'इ'इत्यामन्त्रणेऽव्ययः । त्वं परान्-अन्यान् तारय संसारान्निस्तारयेत्यर्थः । परान् किंविशिष्टान् ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मग्नान्–भवनिमग्नानित्यर्थः। चित्रत्वात् अनुस्वाराभावः। त्वं किंवि० ? युः। इः- कामस्तत्र उः- शङ्करः, दाहकत्वात् सः युः। केन-सुखेन, थो-भीत्राणं (यत्र तत्) यथा स्यात्तथा। कथमिति क्रियाविशेषणम्। त्वं पुनः किंवि० ? न दरिद्रः–नकारस्य निषेधार्थत्वात् अदरिद्रः श्रीमानित्यर्थः। अथवा त्वं दरिद्रः 'पढमभिक्खायरे त्ति वे'तिवचनात् प्रथमभिक्षाचरत्वादित्यर्थः। हे न-हे पूज्य! 'नकारो जिनपूज्ययो' रितिविश्वलोचने इत्यपि बोध्यम्। त्वं पुनः किंवि० ? स्वयमात्मना परं-अन्यं, ईश्वरीकर्तुं नमिविनमिवत् ईश्वरः-प्रभुरित्यर्थः।

**परिग्रहारम्भमग्नास्तार! ये युः कथं परान्।**
**स्त्र! यं *दरिद्रो नपरमीश्वरीकर्तुमीश्वरः ॥२॥**

व्याख्या–परि–समन्तात् 'ग्रहो ग्रहणनिर्बन्धाऽनुग्रहेषु रणोद्यमे' इत्यनेकार्थवचनात् ग्रहोऽनुग्रहो यस्मिन् सः, तस्य सम्बोधनं हे परिग्रह!। हे अमग्न-हे अत्रुडित! क्व ? 'यस्तु वाते यम' इति सुधाकलशवचनात् यो-मृत्युर्मरणमितियावत्, तस्मिन् ये-मरणे-इत्यर्थः। अस्तं-क्षिप्तं, आरं-अरिसमूहः कर्मरूपो येन सः, तस्य सम्बोधनं हे अस्तार!। 'रमा या मा' इत्यत्र या इत्यस्य ई आ इति नाममालावृत्तिव्याख्यानात् सुष्ठु आ–समवसरणादिरूपा लक्ष्मीर्यस्य स स्वः तस्य सम्बो० हे स्व!। 'ई भुवि श्रिया'मितिमहीपवचनात् ई इव-भूमिरिव ई, सर्वसहत्वात्। तस्य सम्बो० हे इ-हे भूमितुल्य! त्वं 'प्रतिपक्षः परो रिपु'रितिहैमवचनात् परान्-रिपून् 'अदु बन्धन' इतिवचनात् अन्द-बधान। कस्य-आत्मनः, थो-भयत्राणं (यत्र तत्)

* यं इति इ अं इति पदच्छेदः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा स्यात्तथा। कथमिति क्रियाविशेषणम्। त्वं किंवि०? शं-व्यंजनशकारं'वांकृगतिगन्धनयो'रिति वाति-गच्छति डप्रत्यये श्व ईदृशो यः रीइतिवर्णस्तं 'कैगैरैशद्व'इति कायति-वदति डप्रत्यये श्वरीक ईदृशः ऋ इति स्वरो यस्य स श्वरीकर् एतावता श्रीऋ इतिसिद्धं। त्वं पुनःकिंवि० ?-तुइतिवर्णं मीनाति-बध्नाति क्विपि तुमीः, ईदृशः यः शकारस्तं वाति-गच्छति वर्णक्रमात् डप्रत्यये श्वः- षकारः, तेन राजते डप्रत्यये सः श्वरः। एवं श्री ऋष इति सिद्धम्। त्वं पुनः किंवि०? अरभ्। अकारेण राजते डप्रत्यये अर ईदृशः भ्इति वर्णो यस्य सः अरभ्। एवं श्रीऋषभ इति सिद्धम्। 'अरभ्' इत्यत्र भकारस्य न वकारः, संज्ञाशद्वत्वात्। चित्र-त्वादनुस्वाराभावः। त्वं पुनः किंवि०? युः 'ई भुवि श्रिया'मिति-महीपवचनात् ई-भूमिः,तस्याः उः-शङ्करतुल्यः, सुखहेतुत्वादिति युः। त्वं पुनः किंवि०? 'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋ-पृथिवी, तस्या इन्द्रः-स्वामी स रिन्द्रः। चित्रत्वादनुस्वाराभावः।, अथवा ऋ-पृथिवी, तत्र यन्ति-चरन्ति क्विपि रितो-मनुष्याः, तेषु राजते डप्रत्यये रिद्रः। त्वं पुनः किंवि०? 'नो बुद्धौ ज्ञानबन्धयो'-रिति सुधाकलशवचनात् नेषु-ज्ञानेषु परमं यत् प्रधानं तत् नपरं-केवल-ज्ञानमित्यर्थः। तद्विद्यते यस्य स नपरमी-केवलीत्यर्थः ॥२॥

इत्यर्थद्वयेन श्रीऋषभजिनं व्यावर्ण्य श्रीअजितजिनं वर्णयति—

परिग्रहारम्भ! मग्नास्तार! ये युः कथं परान्।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥३॥

व्याख्या-ग्रहैः-सूर्यादिभिः, अरं-अत्यर्थं भातीति डप्रत्यये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्बाधने हे ग्रहारम्भ! 'यो वातयशसोःपुंसी'ति विश्वलोचनवचनात् ये-यशसि हे मग्न-हे निमग्न! 'दरिर्वल्लरिर्मञ्जरिः पुञ्जिभेरीति (हैम) लिङ्गानुशासनवचनात् दरिषु–कन्दरेषु द्रवति-वैराग्यवशात् विहरति डप्रत्यये दरिद्रः, तस्य सम्बोधने हे दरिद्र!। अस्ता-लक्ष्मया जिताः, अरयः–शत्रवो येन सः अस्तारिर्भगवत्पिता जितशत्रुरिति गम्यते। तदस्यापत्यं आस्तारः, तस्य सम्बोधनं हे आस्तार–हे अजितजिन!। त्वं, 'कं सुखे' तथा 'थो भीत्राणे' इत्येकाक्षरवचनात् समाहारद्वन्द्वे कथं-सुखभीत्राणं कर्तुं ईश्वरोसि। त्वं किंकुर्वन्? ऊन्–एकादश रुद्रान्। अथवा 'एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वर' इतिवचनात् ब्रह्मविष्णुमहेशान् रलयोरैक्यात् पलान्–मूर्खान् असर्वज्ञा-नितियावत्। सु–अतिशयेन 'अयत्र् गतौ' शतृप्रत्यये अयन्–'गत्यर्था ज्ञानार्था' इतिवचनात् जानन् स्वयन्–विदन्नित्यर्थः। 'पलं मांसं पलं मानं पलो मूर्खः पला तुले' त्यनेकार्थध्वनिमञ्जर्याम्। स्वयमित्यत्र 'यमा यपेऽस्ये'तिसूत्रेण स्वयन्निति सिद्धम्। कथं किं वि०? 'पः प्रौढे पवने पथी'ति सुधाकलशवचनात् पः–प्रौढो, रा–द्रव्यं यत्र तत् परि। कथं पुनः किंवि०? अपरं–अद्वितीयं। त्वं किंवि०? इः–कामस्तत्र उः–शङ्करः, दाहकत्वात् स युः। त्वं पुनः किंवि०? ई–श्रीः तया युक्तं शु–शोभनं 'रथाङ्गं रथपादोऽरिचक्र'मितिहैमनाममालावचनात् अरि–धर्मचक्रं यस्य सः ईश्वरी ॥३॥

**परिग्रहारम्भ! मग्नास्तारये युः* कथं परान्।**
**स्वयं दरिद्रो! न परमीश्वरी कर्तुमीश्वरः ॥४॥**

* ई ऋ इति पदच्छेदे, षष्ठ्येकवचनं युः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या–'परिर्भूमि' इत्युणादिवचनात् परिर्भूमिस्तत्र, परि–समन्ताद्वा रलयोरैक्यात् 'देवनस्तत्पणो ग्लह्' इत्यभिधानचिन्तामणिवचनात् ग्लह्ः-अक्षस्य पणस्तत्र अरं–अत्यर्थं 'भः प्रभावे मयूखे' इति महीपवचनात् भः–प्रभावो राज्ञी राजानमक्षक्रीडायां जयतिस्मेत्येवंरूपो यस्य सः परिग्लहारम्भः–अजितः। भगवति गर्भस्थिते जननी विजयादेवी भर्त्रा जितशत्रुनृपेणाक्षक्रीडायां न जितेतिवचनात्। तस्य सम्बो० हे परिग्लहारम्भ–हे अजित! मग्नो–लक्षणया लीनः सन् आस्ते–तिष्ठति क्वचिपि मग्नाः, ईदृशः ता–लक्ष्मीस्तस्या आं-श्रियं राति–ददाति डप्रत्यये आरः, ईदृशो यो–यानं गजो यस्य सः, तस्य सम्बो० मग्नास्तारय–हे गजलाञ्छन!। 'इ' इत्यामन्त्रणे। दलानि–रलयोरैक्यात् पर्णानि सन्त्यस्य स दली ईदृशो द्रुः–चैत्यद्रुमो यस्य सः दलिद्रुः, तस्य सं० हे दलिद्रो!। त्वं 'ई' श्रीः तया युक्ता 'ऋः पृथिव्यां (देव)मातरी'ति महीपवचनात्। ऋः-भूमिः, तस्याः युः-भूमिसकाशात् 'प्रतिपक्षः परो रिपु'रितिवचनात् परान्–रिपून्, 'परो दूरान्यश्रेष्ठशत्रुषु' इत्यनेकार्थवचनात् परं-दूरं कर्तुं स्वयं आत्मना ईश्वरोऽसि। केन-सुखेन थो–भीत्राणं (यस्मात् तत्) यथा स्यात्तथा। कथमिति क्रियाविशेषणम्। त्वं किंविशिष्टः? 'ईश्वरः स्वामिनि शिवे मन्मथे' इत्यनेकार्थवचनात् ईश्वरः-कामः, सोऽस्यास्तीति ईश्वरी-कामी। नकारस्य निषेधार्थत्वात् न ईश्वरी-अकामीत्यर्थः ॥४॥

परिग्रहारम्भ! मग्नास्तारये युः कथं परान्।
स्वयं दरिद्रोनपर! मीश्वरीकर्तुमीश्वरः ॥५॥

व्याख्या–परिग्रहाः–स्त्रियः परिकरो वा, तथा आ-लक्ष्मीः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतौ एनयोर्वा 'रलयोरैक्यात्' लम्भः- प्राप्तिर्यस्मात् तस्य सम्बो० हे परिग्रहारम्भ ! । 'रलयोरैक्यात्' आ-समन्तात् यो लयो-ध्यान-विशेषस्तस्मिन् आलये हे मग्न-हे लीन ! । दरितान्-चकितान् करोति णिजि क्विपि दरित्, ईदृशो यो रः-स्मरः, तत्र ऊर्दया, तया ऊनो-हीनो यः स ऊनः-निर्दयः, ईदृशः परः-शत्रुर्यः सः, तस्य सम्बो० हे दरिद्रोनपर-हे कामनिर्दयशत्रो ! हे जिन ! भवान् युः-श्रीभूमेः जगत इत्यर्थः । परान्-वैरिणः सु-अतिशयेन, 'अयञ् गतौ' 'गत्यर्था ज्ञानार्था' इतिवचनात् शतृप्रत्यये स्वयन्-अतिशयेन विदन् जानन् आस्त-अभवदित्यर्थः । 'यमा यपेऽस्ये'ति सूत्रेण स्वयमित्यस्य स्वयन्निति सिद्धम् । केन-सुखेन, थो-भयत्राणं (यत्र तत् )यथा स्यात्तथा। कथमिति क्रियाविशेषणम् । भवान् किंवि० ? 'मः शिवे विधौ चन्द्र' इत्येकाक्षरवचनात् मः-चन्द्रः,-तस्य भार्या इतिवाक्ये 'भार्याधवाद्योगा'-दिति ङ्यां च मी-रोहिणी, तस्यां 'शुर्निशाकरः' इतिवचनात् शुः-चन्द्रः जन्मसमये यस्य स मीशुः-'उत्तरसाढारोहिणीमियसीस' इतिवचनात् श्रीअजितजिनइत्यर्थः । तथा अ-कृष्णः, तद्वत् रलयोरैक्यात् ली-लीन-ता-एकत्राऽवस्थानं यत्र सः अलीः, ईदृशः कस्य-पानीयस्य ऋतुः-वर्षाकालो विहाराभावात् येषां ते अलीकर्तवः-साधव इत्यर्थः । वर्षाकाले हि साधवो यथा न विहरन्ति तथा कृष्णोऽपीति तदुपमा । ततस्तेषां मध्ये मी-प्राग्व्याख्यानवत् रोहिणी, तस्याः ईश्वरः-पतिः, सः मीश्वरः-चन्द्र इत्यर्थः । ततः अलीकर्तुमीश्वरः-साधुचन्द्रः इत्यर्थः । ततः कर्मधारये मीश्वलीकर्तुमीश्वरः ॥५॥

इत्यर्थत्रयेण श्री अजितजिनं व्यावर्ण्य श्रीसम्भवजिनं वर्णयति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहा !+ रम्भमग्नास्तारये युः कथं परान् ।
स्वयं दरिद्रोन ! परमी श्वरीकर्तुमीश्वरः ॥६॥

व्याख्या–परिग्रहेण–परिकरेण, असते-दीप्यते क्विपि परिग्रहाः, तस्य सम्बोधनं हे परिग्रहाः ! 'ऋः पृथिव्यां देवमातरी'ति महीपवचनात् ऋः–पृथिवी, तस्यां अं–परब्रह्म तथा 'भः प्रभावे मयूखे' इति-महीपवचनात् भः–प्रभावः, तत्र मग्नः–लीनः तस्य सं० हे रंभमग्न ! । दरो–भयं विद्यतेऽस्यामिति दरिणी–भयवती, ईदृशी या द्रा–निद्रा. तया ऊनः–हीनः, तस्य सं० हे दरिद्रोन ! 'नास्ति जागरतो भय'–मित्युक्ते जागरणं भयरहितं ततो निद्रा भयवतीत्युक्तमिति । त्वं परान्-अन्यान् ई-श्रीः, तया युक्ता 'ऋः पृथिव्यां देवमातरी'तिमहीप-वचनात् ऋः–पृथिवी, तस्याः युः–श्रीयुक्तपृथिव्याः, ईश्वरीकर्तुं–नायकीकर्तुं ईश्वरः–प्रभुरऽसि । त्वं किंवि० ? अस्ताः–लक्षणया जिता अरयो येन सः अस्तारिः–जितारिः श्रीसम्भवजिनजनक इत्यर्थः । तस्यापत्यं आस्तारः, श्रीसम्भवजिन इत्यर्थः । त्वं पुनः किंवि० ? एः इत्यामन्त्रणे 'स्वरे यत्वं वे'ति सूत्रेण ये × रिति सिद्धम् । पः–प्रौढः 'रमः कान्ते रक्ताशोके' इत्यनेकार्थवचनात् रमः–रक्ताशोकः अष्टमहाप्रातिहार्यान्तर्वर्ती स विद्यतेऽस्येति सः परमी ॥६॥

परिग्रहारम्भमग्नास्तारये युः कथं परान् ।
स्व ! यं॥द ! रिद्रो न परमीश्वरीकर्तुमीश्वरः ॥७॥

व्याख्या–'आत्मीयः स्वः स्वकीय' इत्यभिधानचिन्तामणि-

---

+ऋ अं इति पदच्छेदः । ×विसर्गस्य यकारः । ॥इ अंद इति छेदः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनात् स्वः–आत्मीयः, इह संसारे भगवानेवात्मीयः, जन्मजरादि-भयनिवारकत्वात् न तु स्वजनधनादिः। ततस्तस्य सम्बो० हे स्व–हे आत्मीय ! ई-कामं 'अदु बन्धने' इतिवचनात् इं अन्दति-बध्नातीति यन्दः, तस्य सम्बो० हे यंद !। त्वं नोऽस्मान् चित्रत्वाद्विसर्गाभावः। ईश्वरीकर्तुं–नायकीकर्तुं ईश्वरः–प्रभुरसि। परं-प्रकृष्टं यथा स्यात्तथा केन–सुखेन, थो–भीत्राणं यत्र तत् कथं। द्वयमपि क्रियाविशेषणम्। त्वं किंवि० ? परिग्रहो–धनधान्यादिः, आरम्भः-कृष्यादिः, तत्र मग्ना-निमग्नाः ते परिग्रहारम्भमग्नाः-गृहिणः तान्। 'थोवोवि गिहिपसंगो जइणो सुद्धस्स पंकमावहइ' इतिवचनात् अस्यति-लक्षणया त्यजति क्विपि परिग्रहारम्भमग्नाः–गृहस्थादिसङ्गरहित इत्यर्थः। त्वं पुनः किंवि० ? तां-श्रियं, राति-ददातीति डप्रत्यये तारः ईदृशः यं–यकारं ईयते यः सक्विपि येः स चासौ युश्च येयुः ययुरितिसिद्धं। ततः ययुः–तुरङ्गमो यस्य सः तारयेयुः श्रीसम्भवजिनः, अश्वलाञ्छन-त्वात्। त्वं पुनः किंवि० ? 'ऋः पृथिव्यां देवमातरी'ति महीपवचनात् ऋः–भूमिस्तस्यां यन्ति-चरन्ति क्विपि रितो-मनुष्याः, तेषु रा-दीप्ति-र्यस्य। अथवा तेषु राजते डप्रत्यये सः रिद्रः। नः किंवि० ? परान्-श्रेष्ठान् ॥७॥ इत्यर्थद्वयेन श्रीसम्भवजिनं व्यावर्ण्य श्रीअभिनन्दनजिनं वर्णयति-

परिग्रहा× रम्भमग्नास्ता+ रयेयुः कथं प ! रान्।
स्वयं दरिद्रोन ! परमीश्वरीकर्तुमीश्वरः ॥८॥

व्याख्या–'परिर्भूमिरित्युणादिवचनात् परौ-भूमौ, परि-सम-

×अ आ आरभ् अं अक् न इतिछेदः। +तारय इ इति सम्बोधने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्ताद् वा रलयोरैक्यात् ग्लायति डप्रत्यये परिग्लः-म्लानः, निःश्रीकत्वात् ईदृशः 'हो निपाते च हस्ते दारुणि शूलिनी' त्येकाक्षरवचनात् हः-शङ्करो यस्मात् सः तस्य सं० हे परिग्लह ! आत्-अकारात् आ-आकारः तत्र आर-आगमनं स्वरक्रमात् यस्य सः आर-इकारस्तेन युक्तो भ-भकारो यस्य सः आरभ् । एतावता अभिः इति सिद्धम् । तथा अं-अनुस्वारं, अकते-गच्छति क्विपि अमग्, ईदृग् नः-नकारो यस्य सः अमग्नः । ततः आरभ् चासौ अमग्नश्च आरभमग्नः तस्य सम्बोधनं हे आरभमग्न ! । अभिनं इति सिद्धम् । चित्रत्वादनुस्वाराभावः । तथा दात्-दकारात् रिद्रशद्वं अवति-हिनस्ति । अवेर्हिंसार्थत्वात् क्विपि दरिद्रोः ईदृशो नः-नकारो यस्य तस्य सम्बो० हे दरिद्रोन ! । एतावता हे अभिनन्दन ! हेप-हेपवन ! अप्रतिबद्धविहारत्वात् त्वं स्वं-आत्मानं याति-गच्छतीति डप्रत्यये स्वयं-आत्मगं कर्मकरं स्वसेवकमिति यावत् । त्वं तारय-संसारान्निस्तारयेत्यर्थः । त्वं किंवि०? युः । ई-लक्ष्मीः, तस्याः उः-समुद्रः 'उशब्दः शङ्करे तोये तोयधौ धरणीधरे' इति विश्वशम्भुः । पुनः त्वं किंकुर्वन् ? काः-आत्मानः, तेषां थो-भयत्राणं तं कथं-जीवानां भयत्राणम् । 'राङ्क दाने' धातुः शतरि रान्-ददत्, कथं किंवि० ? परं-श्रेष्ठम् । त्वं पुनः किंवि० ? 'ई भुवि श्रिया' मितिमहीपवाक्यात् ई-भूमिस्तस्या ईश्वरा-राजानः ते सन्त्यस्य स ईश्वरी-अनेकनृपयुक्त इत्यर्थः ॥८॥

इति श्रीअभिनन्दनं व्यावर्ण्य श्रीसुमतिजिनं वर्णयति-

परिग्रहा रम्भमग्नास्तारयेयुः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या-परिग्रहाः-स्त्रियः कर्त्र्यः 'पः प्रौढे पवने' इतिवचनात् पाः-प्रौढाः तथा ' रः तीक्ष्णे वैश्वानरे नरे ' इतिसुधाकलशवचनात् राः-नराः, तान् परान्-प्रौढनरान् तारयेयुः-संसारान्निस्तारयेयु-रित्यर्थः। परिग्रहाः किंवि० ? रम्भमग्नाः। म्-मकारः, तस्य भं-राशिः सिंहाख्यः माघिमूमेमघा मता तथा 'मघा पूर्वफाल्गुनी उत्तरफाल्गुनी पादे सिंहः ' इतिवचनात्। म्भं-सिंहराशिरित्यर्थः। ' रः तीक्ष्णे वैश्वानरे नरे ' इतिवचनात् रं-तीक्ष्णं क्रूरं इतियावत्। ईदृशं म्भं-सिंहराशिर्यस्य सः रम्भः-श्रीसुमतिजिनः, मघाजन्मनक्षत्रत्वात् सिंहराशित्वाच्च। क्रूरत्वं च सिंहराशेः 'पुंस्त्रीक्रूराक्रूरा' इतिवचनात्। रम्भे-श्रीसुमतिजिने मग्ना-लीना इत्यर्थः। अत्र दृष्टान्तमाह-यथा कश्चित् नरः स्वयं दरिद्रो न भवति, स च परं-अन्यं ईश्वरीकर्तुं ईश्वरो भवति। तथा परिग्रहाः श्रीसुमतिजिने लीनाः सत्यः स्वयं तीर्णाः परान् तारयेयुरिति युक्तोऽयमर्थः। कथमिति सम्भवेऽव्ययः ॥९॥

**परिग्रहारम्भ ! ×मग्नास्तारयेयुः कथं प ! रान्।**
**स्त्र÷ ! यं दरिद्रो नपरमीश्वरी कर्तुमीश्वरः ॥१०॥**

व्याख्या-सु-इत्यक्षरेण आ-लक्ष्मीर्यस्मात् स स्वः। तस्य सम्बो० हेस्व !। एवं सु इतिसिद्धम्। मात्-मकारात् यो ग्न इति वर्णस्तं अस्यति-क्षिपति क्विपि मग्ना ईदृशो यः त्-व्यञ्जनतकार स्तस्मिन् आरं-इकारं यातीति डप्रत्यये तस्य सम्बो० हे मग्ना-स्तारय !। एवं सुमतीति सिद्धं। अ-आकारस्तस्मिन् स्वरक्रमात्

×म-ग्न-अस्-त्-आ-आर-य इति छेदः। ÷सु अ इति छेदः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरः-आगमनं यस्य स आर-इकार इत्यर्थः। परिग्रहेण-परिकरेण अरं-अत्यर्थं, भाति-राजते डप्रत्यये तस्य सम्बोधने हे परिग्रहारम्भ! हे प-हे प्रौढ! 'पः प्रौढे पवने पथी'ति सुधाकलशः। स त्वं न दरिद्रोऽसि। यत्र नान्यत् क्रियापदं तत्रास्ति भवतीत्यादि क्रियापदं प्रयोक्तव्यमिति ज्ञेयम्। त्वं किंभूतः ? युः। ई-कामस्तत्र उः-शङ्करः यत्तदोर्नित्यसम्बन्धात् यं त्वां स्वामिनं राङ्क् क्वचिदादानेऽपि शतरि रान्-आददत् लक्षणया अङ्गीकुर्वन् ईश्वरो-महादेवः, ईश्वरी भवति-सनाथो भवति, ईश्वरो-नाथोऽस्यास्तीति ईश्वरी। यं किंवि० ? कः-सूर्यः तद्वत् ऋतुः-प्रभा यस्य सः कर्तुः तं कर्तुं 'ऋतुः स्यादार्त्तवे दैरे वसन्तादिषु भासि च' इति विश्वलोचने। यं पुनः किंवि० ? केन-सुखेन, थो-भीत्राणं यस्मात् स कथः तं, कथं पुनः किंवि० ? परं-श्रेष्ठं ॥ १० ॥

इत्यर्थद्वयेन श्रीसुमतिजिनं व्यावर्ण्य श्रीपद्मप्रभजिनं वर्णयति-

परिग्रहारम्भमग्नास्तारयेयुः कथं परान्।
स्वयं दरि द्रोनपरमी श्वरी कर्तुमीश्वरः ॥११॥

व्याख्या द-दकारः, तस्य तत्र वा यो रो-रकारस्तेन ऊनः-रहितः सः-द्रोनः। तथा पं-पकारं 'कैगैरै शब्दे' इति रायति-वक्ति डप्रत्यये परः, द्रोनश्चासौ परश्च द्रोनपरः, ईदृशो मः-मकारोऽस्यास्तीति स द्रोनपरमी। एतावता पद्म इति सिद्धम्। भीमो भीमसेनवत् पद्मः-पद्मप्रभजिनः। दरि कर्तुं ईश्वरोऽस्ति। दानि-कलत्राणि, राः-द्रव्यं समाहारद्वन्द्वे दरि, तत् विधातुं समर्थ इत्यर्थः। इदमैहिकफलं, उपलक्षणत्वात् मोक्षफलमपीत्यर्थः। पद्मः किंभूतः ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहो–धनधान्यादिः, तथा आरंभो–जीवानां वधः तत्र मग्नाः ते परिग्रहारम्भमग्नाः–सपापाः तैः, नतु पुण्यवद्भिः अस्तः–क्षिप्तः लक्षणया मुक्तः, आ–समन्तात् रलयोरैक्यात् लयो-ध्यानविशेषो यस्य सः परिग्रहारम्भमग्नास्तालयः। तथा इः–कामस्तत्र ईः–श्रीस्तया युक्तः उः-शङ्करः, अथवा भीमो भीमसेनवत् युः–मृगयुः, विनाशकत्वात् व्याध इत्यर्थः। ततः प्राग् पदेन सह कर्मधारये परिग्रहारम्भमग्नास्तालयेयुः। पुनः किंवि० ? 'परो दूरान्यश्रेष्ठशत्रुषु' इत्यनेकार्थवचनात् परेषु–शत्रुषु, अन् अः–कृष्णः स इवाचरति शतरि अन्। सन्धौ विहिते परान् इति सिद्धम्। पुनः किंवि० ? सु–शोभनानि 'रथाङ्गं रथपादोऽरिचक्र' मितिवचनात् अरीणि–चक्राणि पाणिपादादौ यस्य सः 'रहचक्कवरंकिया' इति वचनात्। यस्य सः श्वरी। दरि किंवि० ? कलत्रपक्षे सु-अतिशयेन अयः-शुभभाग्यं यस्य तत् स्वयं। द्रव्यपक्षे स्वं–आत्मानं याति–अनुगच्छति डप्रत्यये स्वयं। दरि पुनः किंविशिष्टं ? केन–सुखेन, थो–भीत्राणं यस्मात् तत् कथम्॥ ११ ॥

श्रीपद्मप्रभजिनं व्यावर्ण्य श्रीसुपार्श्वजिनं वर्णयति—

**परिग्रहा× रम्भमग्नास्तारयेयुः कथं प ! रान् ।**
**स्वयंदरिद्रोनपरमीश्व ! रीकर्तुमीश्वरः ॥१२॥**

व्याख्या–परि-भूमिः, तस्या ग्रहो-ग्रहणं यस्मात् तस्य सम्बो० हे परिग्रह !। भगवत्सेवातः नमिविनम्यादिवत् भूमिप्राप्तिः स्यादिति सूचितं। सु इत्यक्षरात् अं–अकारं यातीति अयः, तथा न्दरिद्रोनः-न्द-

×आ आ आरंभ मग्ना इति छेदः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रिद्रशब्दरहितः पः-पकारो यस्य सः स्वयन्दरिद्रोनपः [तस्य सं०] पकारस्य अकारेण सह सन्धौ कृते 'सुपा' इतिसिद्धम् ।[1] रः-रेफात् अमीः-मी इत्यक्षरवर्जितः श्व इति वर्णः यस्य सः रमीश्वः, ततः कर्मधारये संबोधने च स्वयन्दरिद्रोनपरमीश्व [तस्य सम्बो० हे रमीश्व !] एवं हे सुपार्श्व इति सिद्धं । हे प-हे प्रौढ ! त्वं रान्-नरान् रीकर्तुं-कामीकर्तुं ईश्वरोऽसि । कोऽर्थः ? धर्मधर्मिणोरभेदोपचारात् अकामिनो नरान् कामिनो निर्मातुं समर्थ इत्यर्थः । इह तु कामः पुमर्थः प्रतिपादितः, उपलक्षणत्वात् धर्मार्थपुमर्थावपि ज्ञेयौ । त्वं किंवि० ? भीमो भीमसेनवत् युः-मित्रयुः मित्रवत्सल इत्यर्थः । त्वं पुनः किंवि० ? तां-लक्ष्मीं राति-ददाति डप्रत्यये तारः इत्यनेन अर्थपुमर्थदोऽपि भगवानस्तीत्युक्तम् । ए इत्यामन्त्रणे । रान् किंवि० ? 'आ विधातरि मन्मथ' इतिमहीपवचनात् आ-कामः तथा 'आ श्रिया'मितिशिलोञ्छवचनात् आ-लक्ष्मीः तयोः 'रलयोरैक्यात्' लम्भः-प्राप्तिः (आरम्भः-उद्यमः) तत्र मग्ना-निमग्नाः तान् आल-(र)म्भमग्नान्-अर्थकामकाङ्क्षकानित्यर्थः । चित्रत्वादनुस्वाराभावः । कथमित्यव्ययः सम्भवे ॥१२॥

**परिग्रहारम्भमग्नास्तारये युः कथं परान् ।**
**स्व ! यंदरिद्रोन ! परमीश्वरीकर्तुमीश्वरः ॥१३॥**

व्याख्या-सु-शोभना, नाममालावृत्तौ 'या' इत्यस्य ई आ व्याख्यानात् आ-लक्ष्मीः समवसृतिरूपा यस्य सः तस्य सम्बो० हे स्व ! भावप्रधाननिर्देशात् दरिद्रत्वेन ऊनो-हीनः दरिद्रोनः, तस्य सम्बो०

१ रकारो व्यञ्जनत्वात् रः इति पञ्चम्यैकवचनं.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हे दरिद्रोन ! भवान् 'इः श्री'रित्येकाक्षरवचनात् ई-श्रीः, तया युक्ता या ' ऋ पृथिव्यां देवमातरी' ति महीपवचनात् ऋ-पृथ्वी ' पङ्क्ति रथ'न्यायात् श्रीसुपार्श्वजिनमाता तस्या युः-श्रीसुपार्श्वजिनजनन्याः ' रलयोरैक्यात् ' आलये-मन्दिरे, परिग्रहारम्भं परं-श्रेष्ठं कर्तुं आस्त-अभवत् अविशद्वा । भावनिर्देशात् परिग्रहत्वस्य-स्त्रीत्वस्य ' आरम्भस्तु वधदर्पयो'रित्यनेकार्थवचनात् य आरम्भो-दर्पः तीर्थ-करजननीत्वेन नाहं स्त्रीप्रधानेत्येवंरूपोऽहङ्कारस्तं परं-प्रकृष्टं कर्तुं-विधातुं भवान् ईश्वरः-समर्थ आस्त-अभवदित्यर्थः । भवान् किं-कुर्वन् ? यन्-चलन्, कुतः ? ' शसयोरैक्यात् ' स्वः-स्वर्गादित्यर्थः । यं इत्यत्र 'यमा यपेस्ये' ति सूत्रेणानुस्वारस्य नकारे यन्निितिसिद्धम् । ई प्रत्यक्षेऽव्ययः । भवान् किं वि० ? न अग्, कोऽर्थः ? अकं-दुःखं करोतीति णिजि क्विप अग्-दुःखकृत्, नकारस्य निषेधार्थत्वात् । अदुःखकृदित्यर्थः । पुनः किं वि० भवान् ? परान्-शत्रून् अन्तयति-विनाशयति णिजि क्विपि तकारस्य लोपे परान् इति सिद्धम् । कथमित्यव्ययः सम्भवे ॥१३॥

इत्यर्थद्वयेन सुपार्श्वजिनं व्यावर्ण्य श्रीचन्द्रप्रभं वर्णयति—

**परिग्रहारम्भ ! मग्नास्तांर [1]येयुः कथं परान् ।**
**स्वयं दरिद्रोन ! परमी श्वरीकर्तुमीश्वरः ॥१४॥**

व्याख्या-प्-व्यञ्जनपकारस्तस्मिन् अरिग्-रिगशद्बहीनः, ईदृशः यो रः-रकारस्तं जिहीते-गच्छति डप्रत्यये परिग्रहः । प्र इतिजातम् । संज्ञाशब्दत्वान्न पकारस्य बकारः । तत ईदृशः अरम्-रम्

१ ई ए ई उः इति छेदः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दरहितः, अरं–अत्यर्थं वा भः–भकारो यस्य तस्य सम्बो० हे परिग्रहारम्भ ! एवं प्रभ इति सिद्धम्। भीमो भीमसेनवत् हे प्रभ–हे चन्द्रप्रभ ! 'मज्जींन् शुद्धौ' इतिवचनात् मग्नाः–शुद्धाः निःपापाः, ईदृशाः आं–श्रियं 'असी गत्यादानयो' रितिवचनात् असन्ते–आददते–गृह्णन्ति क्विपि आसः–भगवद्दानग्राहका याचका इत्यर्थः, यस्याः सकाशात् सा मग्नाः, ईदृशी ता–लक्ष्मीर्यस्य सः मग्नास्तः। भगवद्वितीर्णलक्ष्मीग्राहकाः भव्या एव भवन्तीति भावार्थः। तस्य संबो० हे मग्नास्त ! हे भव्यार्हलक्ष्मीक ! अथवा मग्नैः–भवनिमग्नैः अस्तः–क्षिप्तः लक्षणया त्यक्तः यः सः तस्य सम्बो० हे मग्नास्त !। 'इ' इत्यामन्त्रणे। दरिद्राणां–निस्वानां–ऊः–रक्षकः 'नो बुद्धौ ज्ञानबन्धयो' रितिसुधाकलशवचनात् नो–ज्ञानं यस्य तस्य सम्बो० हे दरिद्रोन ! त्वं परान्–वैरिणः बाह्याऽबाह्यरूपान् 'रलयोरैक्यात्' आल–निवारयामास 'अली भूषापर्याप्तिनिवारणेषु' इतिधातुः। केन–सुखेन, थो–भीत्राणं च यथा स्यात्तथा। कथमिति क्रियाविशेषणम्। त्वं किंवि०? ई–लक्ष्मीस्तया 'भवेदे र्विष्णु'रित्येकाक्षरात् एः–विष्णुः, स येः तथा ई–श्रीः अष्टप्रकारैश्वर्यरूपा, तया उः–शङ्करः स युः, येश्चासौ युश्च येयुः। त्वं पुनः किंकुर्वन्? 'शसयो रैक्यात्' टोश्वि गतिवृद्धयो–रितिपाठात् शतरि स्वयन्–प्रवर्द्धमानः। पुनः त्वं किंभूतः? परश्चासौ मश्च परमः श्रेष्ठचन्द्रः, सोऽस्यास्तीति परमी चन्द्रचिह्नत्वात् चन्द्रप्रभजिनः। त्वं पुनः किंभूतः? शु–शोभना 'रलयोरैक्यात्' अली–वृश्चिकराशिः जन्मादिसमये 'धणु १ वसह २ मिहुण ३ मिहुणो ४ सीहो ५ कन्ना ६ तुला

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७ अली ८ चेव ' इतिवचनात् यस्य सः श्वली । अथवा 'शसयोरैक्यात्' स्वः-स्वर्गः, तं यावत् ईयते-गच्छति क्विपि स्वरी, स चासौ ईः-कामश्च स्वरीः, तस्य 'कर्तुः कर्मकर' इत्युणादिवचनात् कर्तवः-कर्मकराः, अर्थात् कामिनः, तान् 'मीग्श् हिंसाया' मिति मीनाति-तुर्यव्रतोच्चारणेन लक्षणया निषेधयति क्विपि स्वरीकर्तुमीः, ईदृशः 'शसयो रैक्यात्' स्वरो-देशनाध्वनिर्यस्य सः स्वरीकर्तुमीश्वरः ॥ १४ ॥

श्रीचन्द्रप्रभं जिनं व्यावर्ण्य श्रीसुविधिजिनं वर्णयति—

परिग्रहारम्भ ! मग्नास्तारयेयुः कथं परान् ।
स्व[१]यं दरिद्रोनपरमी श्वरी कर्तुमीश्वरः ॥ १५ ॥

व्याख्या-ग्रहशब्दो नवसङ्ख्यावाचकोऽस्ति । ततः परौ-भूमौ ग्रहो-नवमः तस्य सम्बो० हे परिग्रह-हे नवमजिन ! हे सुविधे ! अरं-अत्यर्थं भाति, तस्य सं० हे अरम्भ ! मकइतिशब्दस्य नो-बन्धस्तत्र अस्तः-प्रक्षिप्तः अर इति शब्दो यत्र सः मग्नास्तारः इति व्युत्पत्त्या मकरः, तं याति-गच्छति डप्रत्यये सः मग्नास्तारयः-मकरगामी मकरलाञ्छन इत्यर्थः । तस्य सम्बो० हे मग्नास्तारय-हे मकरलाञ्छन ! पं-पन्थानं, राति-ददाति डप्रत्यये सम्बो० हे पर ! 'मग्गदयाणं' इतिवचनात् । त्वं स्वेषां-आत्मीयानां, ई-लक्ष्मीः, अं-परब्रह्म ई च अं च यं, तत् कर्तुं ईश्वरोऽसि । त्वं किंवि० ? युः । ई-देह-लक्ष्मीस्तया उः-शङ्करः, गौरवर्णत्वात् स युः । पुनः किंवि० ?

१ स्व ई अं इति छेदः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आ–लक्ष्मीः, तया अः–कृष्णः, स इवाचरति शतरि पश्चात् सन्धौ कृते आन्। त्वं पुनः किंवि० ? दरिद्रवत् ऊनः–असम्पूर्णमनोरथः, ईदृशः पः–प्रौढः रमः–कामो येभ्यः ते दरिद्रोनपरमाः–क्षीणकामत्वात् साधवः, ते विद्यन्तेऽस्येति स दरिद्रोनपरमी। त्वं पुनः किंवि० ? 'रः कामे तीक्ष्णे वैश्वानरे नरे' सुधाकलशवचनात् राः–नराः, नञो योगे अरा–अमर्त्या देवा इत्यर्थः। सु–शोभनाः, अरा–अमर्त्याः, जघन्यभावात् कोटिमिताः पार्श्वदेशे विद्यन्तेऽस्येति सः श्वरी। शुरितिशब्दः तालव्यान्तोऽप्यस्ति उणादिविवरणे। 'ई' इत्यामन्त्रणे। कथमित्यव्ययः संभवे ॥१०॥

श्री सुविधिजिनं व्यावर्ण्य श्रीशीतलजिनं वर्णयति-

**परिग्रहारम्भमग्ना स्तारये युः कथं परान् ।**
**स्वयं दरिद्रो! नपरमी श्वरी कर्तुमी श्वरः ॥ १६ ॥**

व्याख्या दानि–कलत्राणि, रितो-मनुष्याः, तेषां 'रुः सूर्ये रक्षणेऽपी'ति सुधाकलशवचनात् रुः–रक्षणं यस्मात् स दरिद्रुः, तस्य सम्बो० हे दरिद्रो !। कं-सुखं च थो-भीत्राणं च समाहारे च तत् कथं। कर्तुं-निर्मातुं त्वं स्वयं-स्वयमेव युः। ई–श्रीः, तया उः-शङ्करोऽसि। 'ई' प्रत्यक्षेऽव्ययः। अतः कारणात् परान्–अन्यान् ऊन्–शङ्करान् त्वं स्तारय। कोऽर्थः ? 'स्तृगृ आच्छादने' इत्यस्य प्रयोक्तृव्यापारे स्तारय इति रूपसिद्धिः। ततः तान् पिहितान् कारयेत्यर्थः। ऊन् इत्यत्र बहुवचनं एकादशरुद्रग्रहणार्थम्। तत एकादशापि ऊन्–रुद्रान्

२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तारय-आच्छादितान् कारयेत्यर्थः । त्वं किंवि० ? परिं-भूमिं 'रलयो-रैक्यात्' ग्लहं-अक्षपणं आरम्भं-वधं, मग्नं भावे क्तप्रत्यये मज्जनं स्नानं च अस्यति-लक्षणया त्यजति क्विपि परिग्लहारम्भमग्नाः । अत्र 'धुटो धुटि स्वे वे'ति सूत्रेण सकारलोपः । त्वं पुनः किंवि० ? अपगतो रमः-कामो येभ्यः ते अपरमाः-अर्थात् साधवः, ते विद्यन्तेऽस्येति सः अपरमी । त्वं पुनः किंवि० ? 'शसयोरैक्यात्' स्वः-स्वर्गस्तस्य ई-श्रीः, तथा इः-कामो यस्मात् सः स्वरीः । भगवत्सेवातो देवानां श्रीः कामाश्च भवन्तीति भावार्थः । चित्रत्वात् विसर्गाभावः । त्वं पुनः किंवि० ? श्वरः । शुः-चन्द्रः तद्वत्, शु-शोभनो वा अरः-अतीव्रः शीतलजिन इत्यर्थः ॥१६॥

परिग्रहारम्भमग्नास्तार ये युः कथं परान् ।
स्वयं दरिद्रोनपरमी श्वरी कर्तुमीश्वरः ॥१७॥

व्याख्या-कश्चित् दरिद्रं प्रति श्रीशीतलजिनवर्णनं वक्ति-हे दरिद्र ! 'रः तीक्ष्णे' इति वचनात् रः-तीव्रः, नञो योगे अरः शीतलः । एतावता अरः-शीतलजिन इत्यर्थः । शु-शोभनः; अरः-श्रीशीतलजिनो विद्यतेऽस्मिन्निति श्वरी, ईदृशः ई-श्रीः, तस्या ईश्वरः -पतिः, स ईश्वरः-लक्ष्मीवान् पुमान् 'अपरं त्वधुनार्थे स्यादि'-तिविश्वकोषवचनात् अपरं-अधुना । स्वस्मिन् याति-गच्छति ड-प्रत्यये स्वयं-आत्मगं कं-सुखं, थो-भीत्राणं कर्तुं-विधातुं । ऊन्-एकादश रुद्रान् अथवा 'एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वर' इति वचनात् ऊन्-ब्रह्माविष्णुमहेशान् 'रलयोरैक्यात्' 'अली भूषा-पर्याप्ति-निवारणेषु' इतिवचनात् आल-निवारयामास 'नो मे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कप्पइ अज्जप्पभिइं अन्नउत्थिए वा अन्नउत्थियदेवयाणि वा ' इति-वचनात् मिथ्यात्वहेतुत्वात् निषेधयामास । ऊन् किंवि० ? ई-श्रीः तया युक्ता ' ऋ पृथिव्यां देवमातरी ' तिमहीपवचनात् ऋ-पृथिवी जगदित्यर्थः । तस्याः युः-श्रीजगत्याः परान्-शत्रून् मिथ्यात्वहेतुत्वात् । ऊन् पुनः किंवि० ? परिग्रहा-दाराः, आरम्भो-वधः, तत्र मग्नाः-आसक्ताः तान् परिग्रहारम्भमग्नान् । चित्रत्वादनुस्वाराभावः । ईश्वरः किंवि० ? ता-लक्ष्मीतुल्यः सर्वेष्टत्वात् । ईश्वरः पुनः किंवि० ? या-त्रैलोक्यश्रीः, तस्या ईनः-स्वामी, स येनः-तीर्थकरः, तं आचष्टे णिजि क्विपि नकारलोपे ये इतिसिद्धम् । ई इत्यव्ययः पादपूरणे ॥१७॥

अर्थद्वयेन श्रीशीतलजिनं व्यावर्ण्य श्रीश्रेयांसजिनं वर्णयति-

परिग्रहारम्भमग्नास्ता रयेऽयुः कथं पराऽन् ।
स्वयं दरिद्रोनपरमीश्वरीकर्तुमीश्वरः ॥१८॥

व्याख्या-कश्चित् श्राद्धो जायां प्रति श्रीश्रेयांसवर्णनं वक्ति-'दाराः क्षेत्रं वधूर्भार्या जनी जाया परिग्रह ' इत्यभिधानचिन्तामणिवचनात् हे परिग्रह्-हे जाये ! भेषु-नक्षत्रेषु मग्नः-निमग्न आस्ते-तिष्ठति क्विपि भमग्नाः-चन्द्र इत्यर्थः । तद्वत् ता-वदनादिश्रीर्यस्य सः तस्य सम्बो० हे भमग्नास्त ! 'अस्मिन्नसारे संसारे सारं सारंगलोचना ' इतिवचनात् परः-श्रेष्ठः, तस्य सम्बो० हे पर ! अहं अरं-श्रीश्रेयांसं रये-सेवे इत्यर्थः । 'रयि गतौ ' परस्त्रीगमनं त्यजेदित्यादौ गमनार्थानां सेवनार्थत्वात् रये-सेवे इत्यर्थः । अः-'पङ्क्तिरथ 'न्यायात् विष्णुः-श्रीश्रेयांसजनकः तस्मात् 'रुहं जन्मनी'तिवचनात्-रूढो-जातः डप्रत्यये अरः, तं अरं श्रेयांसमित्यर्थः । अहं किंवि० ? अयुः । इः-कामः, उपलक्षणत्वात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कषायादिः । उः–शङ्करः 'एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वर'-इतिवचनात् ते त्रयोऽपि ग्राह्याः । इश्च उश्च यू तौ न विद्येते यस्य सः अयुः–सम्यग्दृष्टिरित्यर्थः । अर्हं पुनः किंवि० ? अः–कृष्णः, स इवाचरति सम्यक्त्वादिना सः शतृप्रत्यये अन्–सम्यक्त्वादिना कृष्णतुल्य इत्यर्थः । अर्हं पुनः किंवि० ? 'ई भुवि श्रिया' मितिमहीपवचनात् ई–भूमिः, तस्यां 'शसयोरैक्यात्' स्वः–स्वर्गस्तस्य आ–लक्ष्मीर्यस्य स ईस्वरः । अरं किंवि० ? केन–सुखेन, थो-भीत्राणं यस्मात् स कथः, तं कथं । अरं पुनः किंवि० ? स्वेषां–आत्मीयानां या–लक्ष्मीर्यस्मात् सः स्वयः, तं स्वयं । अथवा सु–अतिशयेन, अयः–शुभभाग्यं यस्य स तं स्वयं । पुनः किंवि० ? दरिद्रा–निःस्वाः तथा ऊनाः–कुटुम्बाद्यपरिपूर्णास्तेषां परः–धनादि-दानादिना श्रेष्ठः तं दरिद्रोनपरं । अरं पुनः किंवि० ? ई–श्रीः, तया सु-शोभनं–'रथांगं रथपादोऽरिचक्रं' मित्यभिधानचिन्तामणिवचनात् अरि–धर्मचक्रं यस्य स ईश्वरी । तथा ई–पुष्पफलादिसमृद्धिं 'कै-गैरै शब्दे' इतिवचनात् कायन्ति–वदन्ति डप्रत्यये ईकाः, ईदृशाः ऋतवो वसन्ताद्या यस्मात् सः ईकर्तुः । ततः कर्मधारये ईश्वरी कर्तुः तं ईश्वरीकर्तुं । ईश्वरीत्यनेन 'खे धर्मचक्र'मिति देवकृतानां मध्ये प्रथमोऽतिशयः । ईकर्तुरित्यनेन 'ऋतूनामिन्द्रियार्थानामनुकूलत्व'-मित्येकोनविंशः । 'आद्यन्तयोर्ग्रहणेन मध्यस्यापि ग्रहण'मिति न्यायात् शेषा अपि सप्तदश ज्ञेयाः ॥१८॥

परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।
स्वयंद! रिद्रोऽन प! रमीश्वरीकर्तुमीश्वरः ॥१९॥

व्याख्या–'एकारस्तेजसि जले रात्रौ हर्म्योदरे हरौ । व्योम्न्येका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशसङ्ख्याया 'मितिनानार्थरत्नमालावचनात् सु–शोभनः, एः–एकादश सः स्वेः–एकादशसङ्ख्याकः स चासौ अंदो–जिनश्च स स्वयंदः–एकादशजिन इत्यर्थः । अं–परब्रह्म तदेव दं–कलत्रं यस्य । अथवा अं–परमब्रह्म ददातीति डप्रत्यये अन्दो–जिन इत्यर्थः । तस्य सम्बो० हे स्वयंद–एकादशजिन श्रीश्रेयांस ! हे प–हे प्रौढ ! त्वं परान्–अन्यान्, इति 'नणयोरैक्यात्' अण–भण वदेत्यर्थः । इति अध्याहार्यम् । इतीति किं ? ई इतिसम्बोधनेऽव्ययः । ततः हे जनाः ! यूयं परिग्रहो धनधान्यादिः, आरम्भः कृषिवाणिज्यादिः तत्र मग्ना–आसक्ताः कथं भवथ ? 'यत्र नान्यत् क्रियापदं तत्राऽस्ति भवतीति क्रियापदं प्रयोक्तव्य' मिति न्यायः । यतः ता–लक्ष्मीस्तस्या रये–वेगे सति प्राणी युः–अन्धः स्यात् । ईयते–गच्छति क्विपि ईर्गच्छन् उर्नेत्रं यस्य स युः–अन्ध इत्यर्थः । 'उकारः क्षत्रिये नेत्रे' इति नानार्थनाममालावचनात् । त्वं किंवि० ? रं–नरं, श्वरीकर्तुं शोभनत्रिदशीकर्तुं ईश्वरः–प्रभुः, सु–शोभनः अरोऽमर्त्यः–त्रिदश इत्यर्थः । ततः श्वर इतिसिद्धम् । त्वं पुनः किंवि० ? 'ऋः पृथिव्यां देवमातरी' तिवचनात् । ऋर्देवमाता तां एति–स्मरति क्विपि रित् देवस्तद्वत् तेषु वा–दीप्तिर्यस्य सः रिद्रः ॥१९॥

अर्धद्वयेन श्रीश्रेयांसजिनं व्यावर्ण्य श्रीवासुपूज्यजिनं वर्णयति–

**परिग्रहारम्भमग्नास्तार ! येयुः कथं परान् ।**
**स्वयं द ! रिद्रो ! न ! परमीश्वरीकर्तुमीश्वरः ॥२०॥**

व्याख्या–असते–दीप्यते क्विपि आः, तद्भावः अस्ता–दीप्तिः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तया रक्तवर्णत्वात् आरं-मङ्गलं याति-प्राप्नोति 'डप्रत्यये तस्य सम्बो० हे अस्तार ! अथवा सः-सकारस्य, तारा-नक्षत्रं 'गोससी-सू शतभिषग्' इतिवचनात् शतभिषग् नक्षत्रं जन्मादिसमये यस्य सः स्तारः-वासुपूज्यः, जन्मादिसमये शतभिषग्नक्षत्रत्वात्। आ-श्रीः, तया युक्तः स्तारः आस्तारः-श्रीवासुपूज्य इत्यर्थः। तस्य सम्बो० हे आस्तार !। हे द-हे वार्षिकदानदायक ! ऋ-भूमिस्तस्यां भावे क्विपि 'इणक् गतौ' इत्यस्य 'गत्यर्था ज्ञानार्था' इतिवचनात् इत्-ज्ञानं तेन 'रुः सूर्ये रक्षणे' इति सुधाकलशवचनात् रुः-सूर्यतुल्यः, तस्य सं० हे रिद्रो-हे केवलज्ञानभास्कर ! 'नकारो जिनपूज्ययो' रितिविश्वलोचनतः नः-पूज्यः, भीमो भीमसेनवत् पूज्यः-वासुपूज्यः; तस्य सम्बो०हे न !। त्वं या-श्रिया रं-नरं 'रः तीक्ष्णे वैश्वानरे नरे' इतिवचनात् रो-नरः, नञ्योगे अरः-अमर्त्यः, सु-शोभनो अरः श्वरः, श्वरीकर्तुं-सुरीकर्तुं ईश्वरोऽसि। जातेरैक्यात् रान्-नरान् अदेवान् देवीकर्तुं प्रभुरित्यर्थः। त्वं किं कुर्वन् ? परिग्रहो-धनधान्यादिः, आरम्भः-कृषिवाणिज्यादिः, समाहारे परिग्रहारम्भं, यन् नञो योगे अयन्-अगच्छन्। सु-अतिशयेन, अयन्-स्वयन्। स्वयमित्यत्र 'यमा यपेऽस्ये' तिसूत्रेणानुस्वारस्य नकारे स्वयन्निति सिद्धम्। परिग्रहारम्भं किं० ? कस्यात्मनः 'थो भवेद् भयरक्षणे भूधरे च तथा भार' इति सुधा-कलशवचनात् थो-भारो यस्मात् तत् कथं। पुनः त्वं किंवि० ? 'अकि कुटिलायां गतौ' इति अकते-कुटिलं गच्छति क्विपि अग्। नकारस्य निषेधार्थत्वात् न अग्-अकुटिलगन्तेत्यर्थः। त्वं पुनः किं० ? इः-कामः, तत्र युः-भीमो भीमसेनवत् मृगयुरित्यर्थः। त्वं पुनः किंवि० ? पा-प्रौढा, रा-दीप्तिः, तया 'अः कृष्णे विनतासूना'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विति महीपवचनात् अः-गरुडः, पीतरक्तयोरैक्यात् स इवाचरति शतरि परान् ॥२०॥

श्रीवासुपूज्यं व्यावर्ण्य श्रीविमलजिनं वर्णयति-

परिग्रहारम्भमग्नास्तारये युः कथं पराऽऽन ।
स्वयं दरिद्रो नपरमीश्वरी कर्तुर्माश्वरः ॥२१॥

व्याख्या-'तकारस्तस्करे युद्धे क्रोडे पुच्छे चे'तिवचनात् तः-शूकरः, तेन आ राजते-शोभते डप्रत्यये तारः, तस्य सम्बो० हे तार ! शूकरचिह्नत्वात् हे विमल ! हे पर-हे श्रेष्ठ ! । अथवा असते दीप्यते क्विपि आः-दीप्यमानः, ईदृशः तः-शूकरो यस्य सः अस्तः, तस्य सम्बो० हे अस्त ! । रलयोरैक्यात् 'आलिः पालिसखी श्रेणिष्वनर्थे विमले गुण'इति महीपवचनात् आलिः-पङ्क्तिरथन्यायात् विमलः जिनः, तस्य सम्बो०हे आले-हे विमलजिन ! । ए इत्यामन्त्रणे इत्यपि व्याख्यातं । त्वं परिग्रहाः-दारा, तेषां आरम्भ-उपक्रमः, तं परिग्रहारम्भं, स्वयं-आत्मगं कर्तुं दरिद्रोऽसि आश्रवहेतुत्वात् । त्वं किंवि० ? ई-श्रीः, तस्या ईश्वरः-पतिः, स ईश्वरः । त्वं पुनः किंवि०? अकते-कुटिलं गच्छति क्विपि अग्-वक्रः । कस्मिन् ? ये-यमे कुटिल इत्यर्थः । त्वं पुनः किंवि० ? ना-पुरुषः, न तु श्रीमल्लिजिनवत् स्त्रीरूपावतारः । व्याख्यान्तरे तु न अग्-न वक्रः-सरल इत्यर्थः इत्यपि ज्ञेयम् । आ-ब्रह्मा, तद्वत् पीतवर्णत्वात् असते-दीप्यते क्विपि आः । त्वं पुनः किंवि० ? युः । ई-श्रीः, तया युक्तः 'उकारः क्षत्रिये-नेत्रे' इति नानार्थरत्नमालावचनात् उः-क्षत्रियः, स युः । त्वं पुनः किंवि०? आ-श्रीः, तया अः-कृष्णः, स इवाचरति शतरि आन्-श्रिया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृष्णतुल्य इत्यर्थः । त्वं पुनः किंवि०? 'ई भुवि श्रिया' मिति महीप-वचनात् ईः-पृथ्वीः रत्नप्रभादिरूपाः शसयोरैक्यात् स्वः-स्वर्गान् ईयते गत्यर्थानां ज्ञानार्थत्वात् जानाति क्विपि ईश्वरीः, चित्रत्वाद्वि-सर्गाभावः । परिग्रहारम्भं किंवि० ? कस्यात्मनः, थो-भारो यस्मात् सः तं कथं । परिग्रहारम्भं पुनः किंवि० ? 'नोबुद्धौ ज्ञान-बन्धयोरि' तिवचनात् नस्य ज्ञानस्य 'प्रतिपक्षः परो रिपु'रितिवचनात् परः-प्रतिपक्षभूतः तं नपरं ॥२१॥

श्रीविमलजिनं व्यावर्ण्य श्रीअनन्तजिनं वर्णयति-

**परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।**
**स्व! यं दरिद्रो नपरमीश्वरी कर्तुमीश्वरः ॥२२॥**

व्याख्या-परि-समन्तात्, रलयोरैक्यात् ग्लायतीति डप्रत्यये परिग्लः । ईदृशः 'हः शूलिनि करे नीरे क्रोधे गर्भप्रभाषणे' इति सुधाकलशात् हः-क्रोधगर्भप्रभाषणं यस्मात् तस्य सं० हे परिग्लह ! । अः-अकारः, तेन अरं-अत्यर्थं भातीति डप्रत्यये आरम्भः ईदृशः तथा मं-मकारं अकते-गच्छति क्विपि मग्, सचासौ नः-नकारश्च सः मग्नः, तेन असते-दीप्यते क्विपि मग्नाः, ईदृशः तः-तकारो यस्य नाम्नि सः, तस्य सं०हे आरम्भमग्नास्त ! । एतावता हे अनन्त ! । सु-शोभना, अ-लक्ष्मीर्यस्य सः, तस्य सम्बो० हेस्व ! । ई इत्यामन्त्रणे । त्वं पाः-प्रौढाश्च ते रा-नराश्च पराः, तान् परान् । अथवा परान्-अन्यान् रलयोरैक्यात् आल-विभूषयामास । त्वं किंवि० ? दरिद्रः । दानि-कलत्राणि, रितो-मनुष्यास्तेषां रा-दीप्ति-र्यस्मात् स दरिद्रः । त्वं किंकुर्वन् ? यन्-गत्य-र्थानां प्राप्त्यर्थत्वात

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रापयन्नित्यर्थः । नपरं 'नो बुद्धौ ज्ञान–बन्धयो' रितिवचनात् नेषु–ज्ञानेषु परं–उत्कृष्टं केवलज्ञानमित्यर्थः । नपरं किंवि० ? 'कः सूर्यमित्रे' त्यादिसुधाकलशवचनात् कस्य – सूर्यस्य थो – भारः प्रकाशरूपो यत्र तत् कथं । त्वं किंवि० ? ईश्वरः–प्रभुः, कर्तुं–विधातुं काः प्रति ? स्वरीः । शसयोरैक्यात् स्वः–स्वर्गः, तस्य ईः–लक्ष्मीः, चित्रत्वात् विसर्गाभावः ॥२२॥

श्रीअनन्तं जिनं व्यावर्ण्य श्रीधर्मजिनं वर्णयति–

**परिग्रहा रम्भ ! मग्नास्ताऽऽर येयुः कथं परान् ।**
**स्वयं दरिद्रोनपरमी श्वरीकर्तुमीश्वरः ॥२३॥**

व्याख्या–रस्य–रेफस्य अं–अकारं, अवति–अवेर्हिंसार्थत्वात् हिनस्ति–निवारयति क्विपि रोः, ईदृशः नपरशब्देन धकारः तथा मः–मकारः, तौ विद्यते यस्य नाम्नि सः रोनपरमी । धर्म इति सिद्धम् । धर्मो–धर्मनाथ इत्यर्थः । नः–नकारः, 'तथदधन' इत्यादि-वर्णक्रमे पर–उत्तरो यस्य सः नपरः–धकारः इत्यर्थः । 'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋः–भूमिस्तस्यां अं–परमब्रह्म, तेन भातीति डप्रत्यये रम्भो-जिनः, तस्य सम्बो० हे रम्भ–हे जिन ! । त्वं रलयोरैक्यात् पलान्–मूर्खान् जनान्, आल-निवारय । त्वं किंवि० ? परिग्रहेण–परिकरेण, असते–दीप्यते क्विपि परिग्रहाः । त्वं पुनः किंवि०? मग्नं, भावे क्तप्रत्यये मज्जनं–स्नानं, उपलक्षणत्वात् पूजाव-न्दनादिः, तस्मान् आं–लक्ष्मीं, स्तनति–सेवकानां 'दर्शनाद्दुरितध्वंसी वन्दनाद्वाञ्छितप्रद' इत्यादिवचनाद् ददाति क्विपि मग्नास्ता । त्वं पुनः किंवि० ? यां–श्रियं ईयते–गच्छति क्विपि येः । अथवा यो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वातस्तद्वत् ईयते–अप्रतिबद्धत्वात् विहरतीति क्विपि येः। तथा इः–कामस्तत्र उः–शङ्करः, दाहकत्वात् सः युः, ये श्चासौ युश्च येयुः। पुनः त्वं किं कुर्वन् ? सु–अतिशयेन 'अयञ् गतौ' शतरि अयन्–गत्यर्थानां ज्ञानार्थत्वात् जानन्–पश्यन्नित्यर्थः। किमित्याह–'कः सूर्य-मित्र-वाय्वग्नि-ब्रह्मात्म-यम-केकि' ष्विति वचनात् काः–आत्मानो जीवाः इत्यर्थः। तथा थाः–भूधराः मेर्वादयः, समाहारे कथं। एतावता जीवादिपदार्थं मेर्वादिस्वरूपं च यः स्वयन्–अतिशयेन जानन्नित्यर्थः। ऋन्–रत्नप्रभादिपृथ्वीः एति–गत्यर्थानां ज्ञानार्थत्वात् जानातीति क्विपि रित्। त्वं पुनः किंवि० ? 'रीर्भ्रमे' इत्येकाक्षरवचनात् न विद्यते रीर्भ्रान्तिर्येषां ते अरयः–केवलिनः, शु-शोभना अरयः श्वरयः, श्वरीकर्तुं–अकेवलिनः केवलिनः कर्तुं वा ईश्वरः–प्रभुः। यतः त्वं श्वरीकर्तुं–प्राज्ञीकर्तुं ईश्वरः, ततः पलान्-मूर्खान् जनान् निवारयेति युक्तोऽयमर्थः ॥२३॥

**परिग्रहारम्भग्नास्तारयेयुः क ! थं पराऽन्।**
**स्वयंद ! रिद्रोनप ! रमीश्वरी कर्तुमीश्वरः। २४॥**

व्याख्या–ता–श्रीः, तया असते–दीप्यते क्विपि ताः, ईदृशः 'रः कामे, तीक्ष्णे वैश्वानरे नरे। रामे वज्रे च शब्दे' इति सुधाकलशवचनात् रो–वज्रं यस्य तस्य सम्बो० हे तार ! वज्रलाञ्छनत्वात् हे धर्म ! हे क–मित्र !। पः-प्रौढः, रो-देशनाध्वनिर्यस्य तस्य सम्बो० हे पर !। स्वं–अर्थं, इं–कामं, अं–परब्रह्म ददाति डप्रत्यये स्वयंदः–अर्थ-काम-धर्मद इत्यर्थः, तस्य सम्बो० हे स्वयंद !। 'रः कामे' इतिवचनात् रः–कामस्तस्याऽपत्यं रिः–प्रद्युम्नः रूपादिना, तथा नणयोरैक्यात् द्रोणाः–काकाः, तद्वत् स्वकुलपोषकत्वेन पाति–रक्षति डप्रत्यये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रोणपः, रिश्चासौ द्रोणपश्चेति रिद्रोणपः, तस्य सम्बो० हे रिद्रोणप ! । काका हि स्वकुलपोषकाः । यत उक्तं च-'पोषकाः स्वकुलस्यैते काककायस्थकुर्कुटा' इति भगवतस्तदुपमा । ई-श्रीःतया युक्ता 'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋ-पृथिवी, तस्याः युः-श्रीपृथिव्या इत्यर्थः । थं-भीत्राणं त्वं कर्तुं-विधातुं ईश्वरः-प्रभुरसि । त्वं किंवि०? परिग्रहेषु-दारेषु, असते-दीप्यते क्विपि परिग्रहाः । ईदृशी रम्भा-इन्द्राणी येषां ते परिग्रहारम्भा-इन्द्राः तेषां भावे क्तप्रत्यये मग्नं-स्नानं जन्माभिषेकरूपं, तेन असते-दीप्यते-क्विपि परिग्रहारम्भमग्नाः । त्वं पुनः किंवि० ? ई-श्रीः तया या-श्रिया अः-कृष्णः स इवाचरतिक्विपि शतरि अन्-लक्ष्म्या कृष्णतुल्य इत्यर्थः । इ इति पादपूरणेऽव्ययः । त्वं पुनः किंवि० ? रमः-कामो विद्यते यत्र ते रमिणः-कामिनः तेषां इः-कामो यस्मात् स रमीः । जिनो हि काममिच्छतां कामदः इति भावः । तथा शु-शोभनः, अरः-चतुर्थारकलक्षणो विद्यतेऽस्येति सः श्वरी, रमीश्चासौ श्वरी रमीश्वरी ॥२४॥

अर्थद्वयेन श्रीधर्मनाथं व्यावर्ण्य श्रीशान्तिजिनं वर्णयति—

**परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।**
**स्वयं द ! रिद्रो न परमीश्वरीं कर्तुमीश्वरः ॥२५॥**

व्याख्या — ता-श्रीः चतुस्त्रिंशदतिशयादिरूपा, तस्या रलयोरैक्यात् आलयः-वसतिः, तस्य सं० हे तालय ! हे द-हे दायक ! 'श्रीशान्तिनाथादपरो न दानी'ति प्रसिद्धेः । त्वं नः-अस्मान्, चित्रत्वाद्विसर्गाभावः । परान्-श्रेष्ठान्, स्वयं-आत्मना, कर्तुं-विधातुं, ईश्वरोऽसि परं-प्रकृष्टं यथा स्यात्तथा क्रियाविशेषणमेतत् । त्वं किंवि० ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ई-श्रियं, ईयते-गच्छति क्विपि ईः, ईदृशः 'मृगयुः व्याधः मृगश्चे'त्युणादिवचनात् युः-भीमो भीमसेनवत् मृगयुः-मृगो लाञ्छनरूपो यस्य सः ईयुः—मृगलाञ्छनत्वात् श्रीशान्तिजिन इत्यर्थः। त्वं पुनः किंवि०? ऋ-भूमिः तस्यां भावे क्विप 'गत्यर्था ज्ञानार्था' इति वचनात् इत्-ज्ञानं, तेन राजते-शोभते डप्रत्यये रिद्रः। त्वं पुनः किंवि०? 'ई भुवि श्रिया'मितिवचनात् ई- भूमिस्तस्या ईश्वराः-नायकाः ते ईश्वराः-भूमीश्वराः, ते द्वात्रिंशत्सहस्रमिता विद्यन्तेऽस्येति ईश्वरी। पुनः किंवि०? परि-समन्तात् ग्रहाः—'नक्षत्रं तारका तारा ज्योतिषी भमुडु ग्रह' इतिवचनात्' तारा यस्य स परिग्रहः-चन्द्रः, तत्र आस्ते-तिष्ठति क्विपि परिग्रहा-मृगः, रलयोरैक्यात् लम्भो-दर्शनं यत्र स परिग्रहालम्भः-श्रीशान्तिदेवः, मृगचिह्नत्वात्, तत्र मग्ना लीना इत्यर्थः, तान् परिग्रहालम्भमग्नान्। चित्रत्वादनुस्वाराभावः। कथमिति सम्भवेऽव्ययः ॥२५॥

श्रीशान्तिदेवं व्यावर्ण्य श्रीकुन्थुनाथं वर्णयति—

**परिग्रहारम्भमग्नाऽस्तारयेयुः कथंप! रान्।**
**स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥२६॥**

व्याख्या—परिग्रहाः-दाराः चतुःषष्टिसहस्रमिताः, तेषां यः आरम्भ—उपक्रमः, तत्र मग्नः—चक्रवर्तित्वे निमग्नो यः सः, तस्य सम्बो० हे परिग्रहारम्भमग्न! 'दिष्टान्तोऽस्तं कालधर्म' इति (हैम) वचनात् अस्तं-पञ्चत्वं, अस्यति-त्यजति क्विपि अस्ता-मरणभयरहितः, ईदृशः 'रः तीक्ष्णे वैश्वानर' इतिवचनात् रो-वह्निस्तस्य यो-यानं रथ इत्यर्थः, सःरयः—छागः अग्निरथत्वात् चिह्नरूपो यस्य सः, तस्य सम्बो० हे अस्तारय-छागचिह्न-त्वात् हे कुन्थुनाथ! 'ई' इत्यामन्त्रणे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'ईङ्च गता'वित्यतः क्विपि ईर्गच्छन् प्राप्नुवन्, उः-उकारो,यत्र तौ यू, ईदृशौ ककारथकारौ यत्र सः युकथः, ईदृशो म्-मकारस्तं पाति-स्वनाममध्ये रक्षति डप्रत्यये युकथम्पः। चित्रत्वात् विसर्गाभावः। मकारस्यानुस्वारे कुन्थुरिति सिद्धं, तस्य सम्बो० युकथम्प-हे कुन्थो! त्वं स्वे-आत्मीयास्तेषां 'यो वात-यशसोः पुंसी'ति विश्व-लोचनतः यो-यशः, तं स्वयं-स्वकीययशः, परं-प्रकृष्टं कर्तुं ईश्वरोऽसि। त्वं किंवि० ? उणादिवचनात् रा-दीप्तिः, तया पीतवर्णत्वात् 'अः कृष्णे विनतासूना'वितिमहीपवचनात् अः-गरुडः, स इवाचरति शतरि रान्। त्वं पुनः किंवि० ? नदरिद्रः-श्रीमानित्यर्थः। त्वं पुनः किंवि० ? ई-श्रीः, तया शु-शोभनं, 'रथाङ्गं रथपादोऽरिचक्र'मित्य-भिधानवचनात् अरि-चक्ररत्नं, चक्रवर्तित्वे चतुर्दशरत्नगतं विद्यते यस्येति सः ईश्वरी ॥२६॥

श्रीकुन्थुनाथं व्यावर्ण्य श्रीअरजिनं वर्णयति—

**परिग्रहारम्भमग्नास्तारयेऽयुः कथं परान्।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥२७॥**

व्याख्या—'परिर्भूमि'रित्युणादिवचनात् परिं-भूमिं षट्खण्ड-रूपां, चक्रवर्तित्वात् गृह्णाति-आदत्ते अचि परिग्रहः-चक्रवर्तीत्यर्थः, स चासौ अरोऽरजिनश्च परिग्रहारः तं परिग्रहारं, अहं 'रयि गता'विति गत्यर्थानां परस्त्रीगमनं त्यजेदित्यादिवत् सेवनार्थत्वात् रये-सेवे इत्यर्थः। तं किंभूतं ? केन-सुखेन, थो-भीत्राणं यस्मात् सः तं कथं। तं पुनः किंवि० ? परं-श्रेष्ठं, किं कर्तुं ? परान्-अन्यान्, ईश्वरीकर्तुं-अनीश्वरान् ईश्वरान् निर्मातुमित्यर्थः। परान् किंभूतान् ? भमग्नान् वकारच्युतके भवमग्नान्-संसारनिमग्नान्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यञ्जनच्युतकं तु नैषधवृत्तावभ्युपगतमितीह न दुष्टम् । चित्रत्वादनुस्वाराभावः । अहं किंभूतः ? अयुः, इश्च उश्च यू, न विद्येते यू-काममहेशौ यत्र सः अयुः । अहं पुनः किं कुर्वन् ? अयञ् गतौ 'गत्यर्थानां प्राप्त्यर्थत्वात् शतरि सु-अतिशयेन, अयन्-प्राप्नुवन् स्वयन् ताः-लक्ष्मीः प्रति पुनः किंवि० ? दरिद्रः कथं न अहं पुनः किंभूतः ? ईश्वरः । ई-स्वर्गापवर्गादिलक्ष्मीस्तस्या ईश्वरः-स्वामी, जिनेन्द्रसेवनादात्मा स्वर्गापवर्गादिलक्ष्मीनायको भवतीत्यर्थः । ई-श्रीः, तया शु-शोभनः, अरोऽरजिनो यस्य वा स ईश्वरः । इत्यप्यर्थान्तरम् ॥२७॥

श्रीअरजिनं व्यावर्ण्य श्रीमल्लिजिनं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं पराऽन् ।**

**स्वयं दरिद्रो नपरमी श्वरी कर्तुमीश्वरः ॥२८॥**

व्याख्या—'इ' इत्यामन्त्रणे । 'दाराः क्षेत्रं वधूर्भार्या जनी जाया परिग्रह' इत्यभिधानचिन्तामणिवचनात् हे परिग्रह-हे स्त्रि ! श्रीमल्लिजिनस्य स्त्रीरूपत्वात् । इदं विशेषणम् । हे पर-हे श्रेष्ठ ! त्वं 'आ विधातरि मन्मथे' इतिमहीपवचनात् आ-मन्मथः, तस्य य 'आरम्भस्तु वधदर्पयो'रित्यनेकार्थात् आरम्भो-वधः, तं आरम्भं-कन्दर्पवधं-कर्तुं-निर्मातुं, ईश्वरः-प्रभुरसि ! । स्त्रीणां हि कामजयो दुःकर-इति, त्वं तु स्त्रीत्वेऽपि कामं व्यापादयसीत्यर्थः । त्वं किंभूतः ? अकते-कुटिलं गच्छतीति क्विपि अक्—कुटिलगमनः । स्त्रियो हि कुटिला भवन्तीत्यतः । त्वं नकारस्य निषेधार्थत्वात् न अग्-अकुटिल-गन्तेत्यर्थः । पुनः त्वं किंभूतः ? आः-स्वयम्भूः, उपलक्षणत्वात् हरिहरादिः, तस्या अस्ता-क्षिप्ता आ-श्री-पूजादिरूपा येन स आस्ताः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं पुनः किं वि० ? अः–कृष्णः, स इवाचरति शतरि अन्, कया ? रया-दीप्त्या, नीलवर्णत्वात् नीलकृष्णयोरैक्याच्च । त्वं पुनः किं वि ? इः-कामस्तत्र उः-शङ्करः, सः युः । त्वं पुनः किं वि०? दं-स्त्री, स्त्रीत्वं च स्त्रीरूपावतारत्वात् तथा 'रः तीक्ष्णे वैश्वानरे नरे' इति वचनात् रो-नरः तदपत्यं रिः-पुरुषपुत्रः, पुरुषत्वं पुरुषप्रभवस्य धर्मस्योपदेशित्वात्, तद्वत् द्रमति-गच्छति डप्रत्यये दरिद्रः । अथवा दं-स्त्री तद्वत् स्त्रीरूपावतारत्वात् तथा 'ऋ–पृथिव्यां देवमातरी'तिमहीपवचनात् ॠ–भूमिः, तां ऋति-गच्छति क्विपि रित्-पुरुषः, तद्वत् पुरुषप्रभवधर्मोपदेशित्वात् राजते-शोभते डप्रत्यये दरिद्रः । त्वं पुनः किं वि ? 'नो बुद्धौ ज्ञान–बन्धयो' रितिवचनात् नेषु-ज्ञानेषु पं-प्रौढं तत् नपं-केवलज्ञानं, तत्र रमः- रक्ताशोको विद्यतेऽस्येति स नपरमी । कोऽर्थः ? श्रीमल्लिजिनस्याशोकद्रुतले केवलमभूदिति भावः । त्वं पुनः किं वि० ? 'रीभ्रम' इतिवचनात् रीभ्रमः-सन्देह इत्यर्थः, तं ईयते-गच्छति क्विपि रीः, न रीः अरीः, शु-शोभनः, अरी श्वरीः केवलीत्यर्थः । चित्रत्वादनुस्वाराभावः । अथवा 'ईश्वरः स्वामिनि शिवे मन्मथे' इत्यनेकार्थवचनात् ईश्वरः-कामो विद्यतेऽस्मिन्निति ईश्वरी, नकारस्य निषेधार्थत्वात् न ईश्वरी-अकामीत्यर्थः । आरम्भं किं वि० ? कस्यात्मनः,-थो-भीत्राणं यस्मात् सः कथः, तं कथं-आत्मभयरक्षकमित्यर्थः । आरम्भं पुनः किं वि० ? स्वः–स्वीयः 'यो वात–यशसोः पुंसी'तिविश्वलोचनतः यो-यशो यस्मात् स स्वयः, तं स्वयं । कामवधे हि श्रीस्थूलभद्रादेरिवात्मीयं यशोपि भवतीति । आरम्भं पुनः किं वि० ? परं श्लाघ्यमित्यर्थः ॥२८॥

श्रीमल्लिजिनं व्यावर्ण्य श्रीमुनिसुव्रतजिनं वर्णयति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।
स्वयं दरिद्रो नपरमीश्वरी कर्तुमीश्वरः ॥२९॥

व्याख्या—ता-पङ्क्तिरथन्यायात् पद्मा जिनजननी, तस्यां रूढोजातः 'रूहं जन्मनी'तिवचनात् डप्रत्यये तारः-सुव्रतजिन इत्यर्थः, सः कं-सुखं वीतरागत्वप्रभवं, थो-भीत्राणं मोहनीयकर्मजयसमुद्भवा निर्भयतेत्यर्थः, समाहारे कथं तत् । परिग्रहः-स्वपरिवारः, तत्र आरम्भ-उपक्रमो यस्य तत् परिग्रहारम्भं कथं कर्तुं ईश्वरोऽस्ति-प्रभुरस्ति । कथं किंवि० ? स्वस्मिन् याति डप्रत्यये स्वयं-आत्मगमित्यर्थः । स्वयं-आत्मगं सुखं निर्भयत्वं च परिग्रहारम्भं-स्वपरिवारायत्तं कर्तुं-विधातुं तारः-श्रीसुव्रतजिनः ईश्वरः-प्रभुरस्तीत्यर्थः । तारः किंवि० ? अकते-कुटिलं गच्छति क्विपि अग्-कुटिलगमनः, ईदृशः 'नौबुद्धौ ज्ञान-बन्धयो'रितिवचनात् नो-कर्मबन्धः, तं अस्यति-क्षिपति क्विपि अग्नाः । तारः पुनः किंवि० ? ई-पङ्क्तिरथन्यायात् पद्मा जिनजननी, तस्याः 'उकारः क्षत्रिये नेत्रे' इति नानार्थरत्नमालावचनात् उः-नेत्रतुल्य इत्यर्थः, स युः । त्वं पुनः किंवि० ? 'पः प्रौढे' इतिवचनात् पा-प्रौढा, रा-दीप्तिः, तया अः-कृष्णः, स इवाचरति शतरि परान् । तारः पुनः किंवि० ? दरो-भयं विद्यतेऽस्येति दरी-भयवान्, तद्वत्-'द्राङ्क् कुत्सितगताविति द्राति-पलायते डप्रत्यये दरिद्रः, नकारस्य निषेधार्थत्वात् न दरिद्रः अदरिद्रः-सिंहतुल्य इत्यर्थः । तारः पुनः किंवि० ? परम इतिशब्दो विद्यतेऽस्मिन्निति परमी, ईदृशः ईश्वरः शब्दो विद्यतेऽस्येति परमीश्वरी । एवं परमेश्वर इति सिद्धम् । ए इति पादपूरणे ॥२९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति मुनिसुव्रतजिनं व्यावर्ण्य श्रीनमिजिनं वर्णयति—

परिग्रहाऽरम्भमग्नास्तारये युः कथं पराऽन् ।
स्वयं दरिद्रो ! नपरमीश्वरी कर्तुमीश्वरः ॥३०॥

व्याख्या—परि—समन्तात् ‘ ग्रहो ग्रहणनिर्बन्धानुग्रहेषु ’ इति-वचनात् ग्रहोऽनुग्रहो यस्य तस्य सम्बो० हे परिग्रह ! ‘ भः प्रभावे मयूख ’ इति महीपवचनात् भः-तेजः, तस्मिन् मग्ना-निमग्ना सती आस्ते-तिष्ठति, असते-दीप्यते वा क्विपि भमग्नाः-तेजोमयी, ईदृशी या तारा-कनीनिका, तया भमग्नास्तारया हे पर-हे श्रेष्ठ ! । दानि-स्त्रियः, तथा ‘ रः-तीक्ष्णे वैश्वानरे नर ’ इतिवचनात् रो-नरस्तस्यापत्यं रिः, बहुत्वे रयः—मनुष्यपुत्राः, तेषां ‘ द्रुः शाखे ’ त्युणादिवचनात् द्रुः-शाखा सन्ततिरूपा यस्मात् स दरिद्रुः, तस्य सम्बो० हे दरिद्रो ! भगवत्प्रभावादविच्छिन्ना पुत्रादिसन्ततिः स्यादितिभावः । भवान् स्वं—अर्थः, ईः—कामः, अं—परब्रह्म, समाहारे स्वयं अरं—अत्यर्थं, कर्तुं—विधातुं, ईश्वरः प्रभुरस्ति । भवान् किं० ? ई—श्रीः, तया उः—शङ्करः, सः युः—श्रीशङ्कर इत्यर्थः । भवान् पुनः किं० ? अः—कृष्णः, स इवाचरति शतरि अन्—कृष्णतुल्यः, जगन्नाथत्वात् । भवान् किंवि० ? नात्—नकारात्, परोऽग्रगः, मिरिति वर्णो यस्य सः नपरमिः । एवं नमिरिति सिद्धं, ईदृशः ईश्वरशब्दो विद्यते यस्मिन् सः नपरमीश्वरी नमीश्वर इत्यर्थः । ‘ इ ’ इत्यव्ययः प्रत्यक्षे । स्वयं किंवि० ? केन-सुखेन, थो—भीत्राणं यस्मात् तत् कथम् ॥३०॥

श्रीनमिजिनं व्यावर्ण्य श्रीनेमिजिनं वर्णयति—–

३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहारम्भमग्नास्ता रये युः कथं पराऽन्र ।
स्वयंद ! रिद्रो न परमीश्वरी कर्तुमीश्वरः ॥३१॥

व्याख्या--पः-प्रौढश्चासौ रो-नरश्चेति परः, तस्य सम्बो० हे पर-हे प्रौढनर ! उत्तमपुरुषत्वात् । सु-अतिशयेन, 'भवेदेर्विष्णु'-रित्येकाक्षरवचनात् एः-विष्णुः, तं स्वबलेन क्रीडासमये अन्दति-बध्नाति स स्वयन्दः, तस्य सम्बो० हे स्वयन्द ! परिग्रहे-परिवारे अः-कृष्णो यस्य तस्य सम्बो० हे परिग्रहा ! । अथवा परिग्रहः-कलत्रं, आ-लक्ष्मीर्यस्य स परिग्रहाः, ईदृशः अः-कृष्णः, तस्य 'आरम्भो वधदर्पयो'रित्यनेकार्थवचनात् आरम्भः-दर्पः बलप्रभवः, तं परिग्रहा-रम्भं लक्ष्मीकलत्रस्य कृष्णस्य बलं 'परो दूरान्यश्रेष्ठशत्रु'ष्विति-वचनात् परं-दूरं, कर्तुं-विधातुं, त्वं ईश्वरः-प्रभुरसि । त्वं किंवि० ? अकं-दुःखं करोति णिजि क्विपि अग्-दुःखकृत्, ईदृशः 'नो बुद्धौ ज्ञानबन्धयो'रितिवचनात् नो-बन्धः कर्मरूपस्तं अस्यति-क्षिपति क्विपि अग्नाः-दुःखकारिकर्मबन्धक्षेपक ईदृशः ता-लक्ष्मीः, तया युक्तः अः-कृष्णो यस्मात् सः अग्नास्ताः । त्वं पुनः किंवि० ? रया-दीप्त्या, अः-कृष्णः, स इवाचरति शतरि अन्-कान्त्या कृष्णतुल्यः, कृष्णवर्णत्वात् । त्वं पुनः किंवि० ? युः । इः-कामः, तत्र उः-शङ्करः, दाहकत्वात् । पुनः किंवि० ? ऋः-देवमाता तां स्वमातृत्वात् 'इङ्क स्मरणे' इति वचनात् यन्ति-स्मरन्ति क्विपि रितो-देवास्तै-राजते डप्रत्यये रिद्रः । त्वं पुनः किंवि० ? ई-श्रीः, तस्या ईश्वरः-पतिः यः स ईश्वरः-कृष्णः जिनभक्तनृपा विद्यते यस्य स ईश्वरी । 'इ' इत्यामन्त्रणेऽव्ययः ॥३१॥

श्रीनेमिजिनं व्यावर्ण्य श्रीपार्श्वजिनं वर्णयति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहा रम्भमग्नास्ता रये युः कथं प ! रान् ।
स्व ! यंद ! रिद्रोऽनपरमीश्व ! रीकर्तुमीश्वरः ॥२२॥

व्याख्या—'स्वो ज्ञात्यात्मनोः' इत्यनेकार्थवचनात् स्वः—ज्ञातितुल्यः, तस्य सम्बो० हे स्व—हे ज्ञातितुल्य !। रया—दीप्त्या, हे प—हे प्रौढ !। ई—रमां तथा अं—परब्रह्म ददातीति डप्रत्यये यन्दः, तस्य सम्बो० हे यन्द !। ऋ—पृथिवी, तस्यां यन्ति—चलन्ति रितः तत्र सजीवा उपलक्षणत्वात् स्थावराः, तेषां 'रुः सूर्ये रक्षण' इतिवचनात् रुः—रक्षणं यस्मात् स रिद्रुः, तस्य सम्बो० हे रिद्रो !। अः—अकारः, तस्य नो—बन्धो यस्य यत्र वा स अनः, ईदृशः पः—पकारो यस्य सः अनपः। पा इति सिद्धम्। तथा र्—व्यञ्जनरेफः, तेन युक्तः-ईदृशः। तथा न विद्यते मी—मीवर्णो यत्र सः अमीः, ईदृशः श्व इतिवर्णो यस्य नाम्नि सः रमीश्वः, अनपश्चासौ रमीश्वश्च अनपरमीश्वः। एवं पार्श्वः इतिसिद्धं, तस्य सम्बो० हे अनपरमीश्व-हे पार्श्व ! त्वं परान्—अन्यान् रया—दीप्त्या रः—अग्निः तस्यापत्यं रिः—अग्निभूत्वेन स्कन्दः, रीकर्तुं-स्कन्दीकर्तुं ईश्वरो—महेशोऽसि। यथा महेशेन स्कन्दो महातेजाकृतः, तथा त्वमपि परान् तेजस्विनः करोषीत्यर्थः। त्वं किंवि० ? परि—समन्तात् 'ग्रहो ग्रहणनिर्बन्धाऽनुग्रहेषु रणोद्यमे। उपरागे पूतनादावादित्यादौ विधुन्तुदे' ॥१॥ इति हैमानेकार्थवचनात् ग्रहो—राहुस्तद्वत् नीलवर्णत्वात् असते—दीप्यते क्विपि परिग्रहाः। पुनः किं कुर्वन् ? युः—पृथिव्याः कं—सुखं च थो भीत्राणं च समाहारे कथं—सुखभीत्राणं 'राक्ङ्—दाने' शतरि रान्—ददत्। त्वं पुनः किंवि० ? रम्भः—भामा सत्यभामावत् परिरम्भः—आश्लेषः, तत्र मग्ना आस्ते क्विपि रम्भमग्नाः—आलिङ्गनासक्ता,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईदृशी ता—केवलश्रीः तया असते—दीप्यते क्विपि रम्भमग्नास्ताः ‘इ’ इत्यामन्त्रणे ॥३२॥

श्रीपार्श्वं व्यावर्ण्य श्रीवीरं वर्णयति—

परिग्रहारम्भमग्नास्तारयेयुः कथं पराऽन ।
स्त्र यं दरिद्रोनप ! रमीश्वरीकर्तुमीश्वरः ॥३३॥

व्याख्या—रः—रकारः, तथा न विद्यते मीवर्णो यत्र सः, अमीः यः श्—शकारः तथा व्—वकारः, इतरेतरद्वन्द्वे रमीश्वः, तेषु यथाक्रमं अं—अकारं रीं—रीकारं, ईं-ईकारं, कैगैरै शब्दे इति कायति—वदति डप्रत्यये रमीश्वरीकः। एतावता श्रीवीर इतिसिद्धम्। तस्य सम्बो० हे रमीश्वरीक—हे श्रीवीर ! । पः—प्रौढो, रो—देशनाध्वनिर्यस्य तस्य सम्बो० हे पर ! दरिद्रान्—निःस्वान् तथा उदया, तया ऊनान्—रहितान् चण्डकौशिकादीन् पाति—रक्षति डप्रत्यये दरिद्रोनपः, तस्य सम्बो० हे दरिद्रोनप ! त्वं स्वः—स्वकीय इवाचरति स्वति, तस्य पञ्चम्या ह्रौ स्व—स्वकीय इव आचरेत्यर्थः । त्वं किंभूतः ? ‘परिर्भूमि’रित्युणादिवचनात् परिः—समवसरणभूमिः, तस्यां परि—समन्तात् वा ‘नक्षत्रं तारका तारा ज्योतिषी भमुडु ग्रह’ इत्यभिधानचिन्तामणिवचनात् ग्रहा—नक्षत्राणि, तेषु तैर्वा असते-दीप्यते क्विपि ग्रहाः-चन्द्रः । तथा चित्रत्वात् अनुस्वाराभावः ! ‘रः—तीक्ष्णे’ इति वचनात् रा—तीक्ष्णा भा—दीप्तिर्यस्य सः रभः—तीक्ष्णांशुत्वात् सूर्यः, तयोर्मग्ना-निमग्ना, आ—श्रीर्यत्र सः परिग्रहारम्भमग्नाः । अनेन भगवतो वन्दनार्थं शशिभास्करौ समागताविति सूचितम् । त्वं पुनः किं० ? तस्याः ‘सिंहो मनस्ताल’ इतिवचनात् रलयोरैक्यात् भीमो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीमसेनवत् 'तेलुग्वे 'ति सूत्रेण पूर्वपदलोपे तालः-मनस्तालः पार्वतीसिंहः, तद्वत् यातीति तालयः-सिंहः, तं ईयते-गच्छति किंपि तालयेः। तथा इः-कामस्तत्र उः-शङ्करः, स युः, ततः कर्मधारये तालयेयुः। पुनः त्वं किंवि०? यन् 'ईणक् गतौ' शतरि यन्-विहरन् क-आत्मा, तस्य थो-भीत्राणं (यत्र तत्) यथा स्यात्तथा, कथमिति क्रियाविशेषणम्। पुनः त्वं किं०? अन् - गरुड इवाचरन् देहदीप्त्या। त्वं किं०? युः। ई-भूमिः, तत्र उः-शङ्करः। त्वं पुनः किं०? ऋतुः-स्त्रीरजः, तं मीनाति-हिनस्ति बध्नातीति यावत् क्विपि ऋतुसमये स्त्रीणां कामसेवनात् ऋतुबन्धो भवतीति ऋतुमीः, ऋतुमीः स चासौ इः-कामश्च ऋतुमीः, तत्र ईश्वरः-शङ्करः स ऋतुमीश्वरः 'इ' इत्यामन्त्रणे ॥३३॥

**परिग्रहारम्भमग्नास्तारये युः कथं परान्।**
**स्वयं दरिद्रोन! परमीश्वरीकर्तुमीश्वरः ॥३४॥**

व्याख्या—'इ' इत्यामन्त्रणे 'परिर्भूमि 'रित्युणादिवचनात् परिः-समवसृतिभूमिः, तस्यां ग्रहाः-आदित्यादयो यस्य सः परिग्रहः, तस्य सम्बो० हे परिग्रह! 'दरिर्वल्लरिर्मञ्जरिः पुञ्जिभेरी' त्यादि-लिङ्गानुशासनात् दरिषु-कन्दरेषु द्राति-शेते डप्रत्यये दरिद्रः-गुहा-शायित्वात् सिंहः, तस्य स्वलाञ्छनगतस्य ऊः-रक्षणं, तेन ततो वा 'नकारो जिनपूज्ययो 'रिति विश्वलोचनतः नः-पूज्यः, तस्य सम्बो० हे दरिद्रोन! भवान् ई-श्रीः, तया या-विभूत्या 'आरम्भो वधदर्पयो 'रित्यनेकार्थवचनात् आरम्भं-दर्पं गर्वं, न आर- न प्राप। भवान् किंवि०? ई-श्रीः, तया युक्ता 'ऋ पृथिव्यां देवमातरी 'ति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनात् ऋ–भूमिः, तस्या युः–श्रीजगत्याः, अकं–दुःखं करोति णिजि क्विपि अग्–दुःखकृत्, नकारस्य निषेधार्थत्वात् न अग् अदुःखकृदित्यर्थः। भवान् पुनः किंवि० ? आं–श्रियं, स्तनति–वक्ति क्विपि आस्ता। भवान् किं कुर्वन् ? 'कः स्मरस्वर्गवह्नि'ष्विति महीपवचनात् कः–स्वर्गः, थो–भीत्राणं, समाहारे कथं, 'राङ्क् दाने' शतरि रान्–ददवित्यर्थः। भवान् पुनः किंवि० ? स्वं–आत्मानं, याति डप्रत्यये स्वयं–आत्माश्रितं, परं–अन्यं, ईश्वरीकर्तुं ईश्वरः–प्रभुरित्यर्थः ॥३४॥

अर्थद्वयेन श्रीवीरं व्यावर्ण्य सर्वान् जिनान् वर्णयति—

**परिग्रहारम्भमग्नास्ता ! र ! येऽयुः कथं परान् !**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥३५॥**

व्याख्या–हे र–नर ! परिग्रहो–धनधान्यादिः, आरम्भः– कृषि-वाणिज्यादिः, समाहारद्वन्द्वे परिग्रहारम्भं ये स्वयं–आत्मनैव, नतु परोपदेशादित्यर्थः । न अयुः–न गताः। एतावता ये स्वयमेव निःस्पृहा जाताः। यत्तदोर्नित्यसम्बन्धात् तान्। परान्-तीर्थकरान्, हे र–हे नर ! नणयोरैक्यात् त्वं अण–वद ब्रूहीत्यर्थः। परशब्दः तीर्थकरनामवाची अर्हन्नामसहस्रसमुच्चये प्रथमप्रकाशेऽस्ति। यदुक्तं–'विष्णुर्जिष्णु जयी जेता, जिनेन्द्रो जिनपुङ्गवः। परः परतरः सूक्ष्मः, परमेष्ठी सनातनः' ॥१॥ इति। परिग्रहारम्भं किंवि० ? अकं–दुःखं, करोति णिजि क्विपि अग्–दुःखकारि। ये किंवि० ? अस्तः–क्षिप्तः 'आ विधातरि मन्मथ' इति महीपवचनात् आः–कामो यैः ते अस्ताः–वीतरागा इत्यर्थः। अथ व्यतिरेकेणाह–परं–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलं 'ईश्वरः स्वामिनि शिवे मन्मथ' इत्यनेकार्थात्' ईश्वरः–कामो विद्यतेऽस्मिन्निति ईश्वरी–कामी सराग इत्यर्थः। स च ईश्वरः–जगतां नाथः, कथं स्यात्? अपि तु न स्यादित्यर्थः। अत्रैकत्वं जातेरेकत्वविवक्षया। कोऽर्थः? ये च स्वयमेव निःपरिग्रहा जाताः तथा च जितकामाः। हे भव्य! त्वं तान्–तीर्थकरान् ब्रूहीत्यर्थः। परिग्रहारम्भं किंवि०? ई–लक्ष्मीः, तस्याः 'कर्तुः कर्मकर' इत्युणादिवचनात् कर्तुः–कर्मकर इत्यर्थः, तं ईकर्तुम् ॥३५॥

अर्धद्वयेन सर्वजिनान् व्यावर्ण्य तदीयध्वनिं वर्णयति––

**परिग्रहारम्भमग्नास्तार! ये युः कथं पराऽऽन।**
**स्व! यं दरिद्रो न! परमीश्वरी कर्तुमीश्वरः ॥३६॥**

व्याख्या–परि–समन्तात्, 'नक्षत्रं तारकाः तारा ज्योतिषी-भमुडु ग्रह' इत्यभिधानचिन्तामणिवचनात् ग्रहाः–तारकाः यस्य स परिग्रहः–चन्द्रः, उपलक्षणत्वात् सूर्यादयः। तथा आ-समीपे, रम्भा–इन्द्राणी येषां ते आरम्भा–इन्द्राः, तेषां यत् मग्नं–भावे क्तप्रत्यये मज्जनं स्नानं जन्माभिषेकरूपं, तेन असन्ते–दीप्यन्ते क्विपि परिग्रहारम्भमग्नासः तीर्थकराः, इन्द्रनिर्मितजन्माभिषेकत्वात् तेषां 'तारोऽत्युच्चैर्ध्वनि'रित्यभिधानचिन्तामणिवचनात् तारः–उच्चैर्ध्वनिः, तस्य सम्बो० हे परिग्रहारम्भमग्नास्तार!। पं–मुक्तिरूपं–पन्थानं, राति–ददाति डप्रत्यये परः, तस्य सम्बो० हे पर!। सु–शोभना आ–लक्ष्मीर्यस्मात् स स्वः, तस्य सम्बो० हे स्व!। 'नकारो जिन-पूज्ययो'रितिविश्वलोचनतः हे न–हे पूज्य! त्वं 'अः कृष्ण' इति वचनात् आन्–वासुदेवान्, उपलक्षणत्वात् बलदेवचक्रि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थकरान कर्तुं-निर्मातुं ईश्वरोऽसि। त्वं किंवि० ? या-श्रीः, तस्या इनान्-स्वामिनः करोति णिजि क्विपि 'नाम्नो न' इति नलोपे ये इतिसिद्धम्। त्वं पुनः किंवि० ? इः-कामस्तस्य उः-शङ्करः, दाहकत्वात् तुर्यव्रतोच्चारणादिना स युः। त्वं पुनः किंवि० ? 'दो दातृ - दानयो' रित्येकाक्षरात् दाः-दातार ईदृशा 'ऋः - पृथिव्यां देवमातरी 'तिवचनान् ऋः - पृथिवी, तां यन्ति गच्छन्ति क्विपि रितः-भूमिचारिणः, रा-नरा यस्मात् दरिद्रः। जिनवचनश्रवणादेव नरा दानिनो भवन्तीतिभावः। त्वं पुनः किंवि०? शसयोरैक्यात् स्वराः-षड्जादयो विद्यन्तेऽस्मिन्निति स्वरी। किं कुर्वन्? 'परो दूरान्यश्रेष्ठशत्रुषु' इत्यनेकार्थत्वात् परं-दूरं, योजनप्रमाणां भुवं, यन्-गच्छन्, स्वरी-स्वरवान् स्यात्। कोऽर्थः ? दूरं गतोऽपि क्षीणो न भवतीत्यर्थः। तत्रापि च तादृश एव श्रूयत इत्यर्थः। कथमिति संभवेऽव्ययः ॥३६॥

जिनेन्द्रवाणीं व्यावर्ण्य शासनसुरीं वर्णयति-

**परिग्रहारम्भमग्नास्तारयेयुः कथं परान्।**
**स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥३७॥**

व्याख्या-भीमो भीमसेनवत् ईश्वरी-चक्रेश्वरीदेवी, परान्-वैरिणः युः-श्रीजगतीतः। तथा शसयोरैक्यात् ई-श्रीः, तया युक्तः स्वः-स्वर्गः तस्मात् ईस्वः-श्रीस्वर्गात्, परं-दूरं, कर्तुं-विधातुं, स्वयं-आत्मना, न दरिद्रा-समर्थेत्यर्थः। अथवा 'रः तीक्ष्णे वैश्वानरे नर' इति वचनात् न रः अरः- सुर इत्यर्थः, तस्य स्त्री अरी-सुरी शु-शोभना सम्यग्दृष्टित्वेन या अरी सा श्वरी, ई-श्रीः, तया युक्ता श्वरी ईश्वरी-श्रीसु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रीत्यर्थः। सा परान्–वैरिणः धर्मान्तरायकारिणः, परं–दूरं, युः श्रीजगतीतः तथा ईस्वः-श्रीस्वर्गात् परं-दूरं कर्तुं न दरिद्रा-समर्थेत्यर्थः। ईश्वरी किंवि० ? परिग्रहाः–दाराः, तेषां 'आरम्भस्तु वधदर्पयो'रित्यनेकार्थात् आरम्भो–दर्पः रूपसौभाग्यादिप्रभवः, तत्र मग्ना–निमग्नेत्यर्थः, सा परिग्रहारम्भमग्ना। ईश्वरी पुनः किंवि० ? आ–समन्तात्, असते–दीप्यते क्विपि आः, ईदृशं ता–श्रीदेवता, तद्वत् रलयोरैक्यात् आलयो–भवनं भवनपतिजातीयत्वात् यस्याः सा अस्तालया। ईश्वरी पुनः किंवि० ? ई–लघिमाद्यष्टविधैश्वर्यश्रीः, तया युः–श्रीशङ्करतुल्येत्यर्थः। ई–श्रीः, तया युक्त उः–शङ्करः सः युः, श्रीशङ्कर इत्यर्थः। कथमित्यव्ययः सम्भवेऽनेकार्थसङ्ग्रहे प्रोक्तोऽस्ति। 'उ' इत्यव्ययः पादपूरणे। 'अ' इत्यव्ययं सम्बोधने। चित्रत्वाद्विसर्गाभावः। अथवा 'ऋ–पृथिव्यां देवमातरी 'तिवचनात् ऋ–देवमाता, तस्याः सम्बोधने ऋकारान्तत्वात् अः इतिसिद्धम्। ततः हे अः–हे देवमातः! त्वं परान् परं कर्तुं नदरिद्रा। त्वं किंवि० ? ईश्वरी इत्यपि व्याख्येयम् ॥३७॥

श्रीशासनसुरीं व्यावर्ण्य पञ्च श्रीपरमेष्ठिनो वर्ण्यन्ते। तत्रार्हत्संज्ञं प्रथमं परमेष्ठिनं वर्णयति—

**परिग्रहारम्भमग्नास्तारयेयुः कथं परान्।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥३८॥**

व्याख्या—परिग्रहो–धनधान्यादिः, आरम्भः कृषिवाणिज्यादिः, तत्र मग्नाः–निमग्ना आसते–तिष्ठन्ति क्विपि परिग्रहारम्भमग्नासः, तेषां तारो–निस्तारो यस्मात् सः परिग्रहारम्भमग्नास्तारः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशेषणसामर्थ्यात् तीर्थंकरः । सः परान्–अन्यान्, परमीश्वरी कर्तुं स्वयमात्मना कथं न ईश्वरः ? अपि तु ईश्वर एवेति भावः । कोऽर्थः? परमशब्दो विद्यतेऽस्मिन्निति परमी–परमशब्दयुक्तः सचासौ ईश्वरशब्दश्च परमीश्वरः । एवं परमेश्वर इतिसिद्धम् । परमीश्वरीकर्तु–मितिकोऽर्थः ? अपरमेश्वरान् परमेश्वरीकर्तुं समर्थः । इत्यर्थः । तीर्थकरः किंवि० ? 'धर्मयुः धर्मिष्ठ' इत्युणादिवचनात् भीमो भीमसेनवत् 'ते लुग्वे'तिपूर्वपदलोपे युः–धर्मयुर्धर्मिष्ठ इत्यर्थः । तीर्थंकरः पुनः किंवि० ? न दरिद्रः–श्रीमानित्यर्थः । 'ए' इत्यव्ययः पादपूरणे ॥३८॥

श्रीअर्हन्तं व्यावर्ण्य द्वितीयं परमेष्ठिनं श्रीसिद्धं वर्णयति—–

परिग्रहारम्भमग्नास्तारयेयुः कथं प ! रान् ।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥३९॥

व्याख्या—परिग्रहं–परिवारं कलत्रं वा । अथवा 'परिर्भूमि'-रित्युणादिवचनात् परिं–भूमिं क्षेत्रगृहादिविषयां, 'ग्रहो ग्रहण-निर्बन्धानुग्रहेषु रणोद्यमे' इत्यनेकार्थवचनात् ग्रहं–रणोद्यमं तथा आरम्भं–कृषिवाणिज्यादिकं तथा भावे क्तप्रत्यये मग्नं–मज्जनं स्नानमित्यर्थः, तथा 'दिष्टान्तोऽस्तं कालधर्मोऽवसान'मित्यभिधान-चिन्तामणिवचनात् अस्तं-मरणं च अस्यति–क्षिपति लक्षणया त्यजति वा क्विपि परिग्रहारम्भमग्नास्ताः–सिद्धः, कलत्रादिमरणपर्यव-सानधर्माणामभावात् तस्य सम्बो० हे परिग्रहारम्भमग्नास्ताः ! इ इत्यामन्त्रणे, 'रा दीप्ति'रित्युणादिवचनात् रा–तेजः, तया रया–तेजसा हे प–हे प्रौढ ! त्वं परं–अन्यं, ईश्वरीकर्तुं ईश्वरोऽसि । त्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंवि० ? नदरिद्रः–नकारस्य निषेधार्थत्वात् अदरिद्रः–श्रीमानित्यर्थः। स्वयं–आत्मना। अथवा 'नकारो जिनपूज्ययो'रितिविश्वलोचनतः। हे न–हे पूज्य ! त्वं स्वयं दरिद्रः सन् धनधान्यादिराहित्यात् परं ईश्वरीकर्तुं ईश्वरः इत्यपि व्याख्येयम्। त्वं किं कुर्वन् ? कं–अनन्तसुखं, थो–निर्भयता मरणाद्यभावात्, समाहारे कथं–अनन्तसुखं निर्भयतां च 'राङ्क–दाने क्वचिन्नादानेऽपी' ति वचनात् शतृप्रत्यये च रान्–आददत् बिभ्रदित्यर्थः। त्वं पुनः किंवि० ? मित्रयुर्मित्रवत्सलः इत्यर्थः ॥३९॥

परिग्रहारम्भमग्नास्तारये युः कथं परान्।
स्वयं द ! रिद्रोऽन ! परमीश्वरीकर्तुमीश्वरः ॥४०॥

व्याख्या—परि–समन्तात्, ग्रहाः–तारका विद्यन्ते यस्य स परिग्रहः–चन्द्रस्तद्वत् 'चंदेसु निम्मलयरा' इति वचनात् असते–दीप्यते क्विपि परिग्रहाः, तस्य सम्बो० हे परिग्रहाः ! 'ऋ पृथिव्यां देवमातरी'तिमहीपवचनात् ऋ–भूमिस्तस्यां अं–परब्रह्म, तेन भान्ति डप्रत्यये रम्भा–जिनास्तेषु न तु पापिषु मग्नो यः स रम्भमग्नः, तस्य सम्बो० हे रम्भमग्न !। जिनेष्वेव सिद्धस्तिष्ठति, न तु पापिहृदयेष्वित्यर्थः। अस्तौ क्षिप्तौ, आरयौ आरं-आरसमूहः अष्टविधकर्मरूपः तथा 'यस्तु वाते यम'इतिवचनात् यो-मृत्युर्मरणमितियावत् येन सः अस्तारयः,तस्य सम्बो०हे अस्तारय !'इ' इत्यामन्त्रणे। 'नो बुद्धौ ज्ञानबन्धयो'रितिवचनात् न विद्यते नः–कर्मबन्धो यस्य स अनः, तस्य सम्बो० हे अन–हे अबन्धक !। दः–दाता, तस्य सम्बो० हे द–दाता तूक्तोऽभयप्रद' इतिवचनात् हे अभयदायक ! त्वं परान्–अन्यान्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शसयोरैक्यात् स्ववत् राजन्ते डप्रत्यये स्वराः, अस्वरान् श्रीकर्तुं ईश्वरोऽसि । त्वं किं कुर्वन् ? ई–श्रीः, तया युक्ता ऋ–भूमिः, तस्याः युः–श्रीभूमेः, का–आत्मानः, तथा था–भूधराः मेर्वादयः समाहारे कथं । सु–अतिशयेन, अयन्-' गत्यर्था ज्ञानार्था ' इतिवचनात् विदन्-जानन्निति स्वयन् । स्वयमित्यस्य 'यमा यपेऽस्ये'ति सूत्रेण स्वयन्निति सिद्धम् । त्वं किंवि० ? ऋ पृथिव्यां देवमातरी' तिमहीपवचनात् ऋ–पृथ्वी, तामेव एति श्रयति क्विपि रित्–सिद्धशिला, तत्र षट्कायानां मध्ये केवलपृथ्वीकायस्यैव सद्भावात् । यत उक्तं च– ' पुढविआउवणस्सइ बारसकप्पेसु सत्तपुढवीसु पुढवी जा सिद्धसिले' तिवचनात् । ततः तस्यां राजते डप्रत्यये रिद्रः । अथवा ऋ–पृथिवी, तस्या एव भावे क्विपि इत्–गमनं यत्र सा रित्–सिद्धशिला प्राग् युक्त्या । शेषं प्रागवत् व्याख्यानम् ॥४०॥

श्रीसिद्धं वर्णयित्वा तृतीयं परमेष्ठिनं श्रीसूरिं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं परान् ।**
**स्वयंदरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥४१॥**

व्याख्या–सू इति वर्णात् न विद्यते यन्दशब्दो यत्र सः स्वयन्दः, ईदृशो रिः–रिकारः, तं द्रमति–गच्छति डप्रत्यये स्वयन्दरिद्रः। सूरिरितिसिद्धम् । तस्य सम्बो० हे स्वयन्दरिद्र–हे सूरे ! 'उ' इत्यामन्त्रणे, त्वं परान्–अन्यान्–तारय–निस्तारय । त्वं किंवि० ? न परिग्रहारम्भमग्नाः । परिग्रहो–धनधान्यादिः, आरम्भः–कृषिवाणिज्यादिः, तत्र मग्न आस्ते–तिष्ठति क्विपि परिग्रहारम्भमग्नाः, नकारस्य निषेधार्थत्वात् अपरिग्रहारम्भमग्ना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यर्थः । त्वं पुनः किंवि० ? परान्–भावारीन् ' मीञ् हिंसायां ' मीनाति–हिनस्ति क्विपि परमीः–अरहा जिन इत्यर्थः । स चासौ ईश्वरः–स्वामी च परमीश्वरः–जिनेश्वरः, स विद्यतेऽस्मिन्निति स परमीश्वरी–जिनेश्वरयुक्तहृदय इत्यर्थः । त्वं पुनः किंवि० ? कं सुखं, थो–भीत्राणं, समाहारे कथं–सुखभीत्राणं कर्तुं ई–श्रीः, तया युक्त उः–शङ्करः स युः श्रीशङ्कर इत्यर्थः । यथा लोके शङ्कर ईश्वर एव गीयते तथाऽयमपीत्यर्थः । ' इ ' अव्ययः प्रत्यक्षे ॥४१॥

श्रीसूरिं व्यावर्ण्य क्रमागतं चतुर्थं परमेष्ठिनं श्रीउपाध्यायं वर्णयति

**परिग्रहारम्भमग्नास्तारयेयुःकथं परान् ।**
**स्वयं दरिद्रोनप ! रमीश्वरीकर्तुमीश्वरः ॥४२॥**

व्याख्या—दा–दानिनः, ईदृशा ऋ–पृथिवी, तां यन्ति–गच्छन्ति क्विपि रितः–भूमिचारिणः, रा–नरा यस्मात् स दरिद्रः, ~~तस्य सम्बो० हे दरिद्र ! । उः–उकारस्तस्य नो–बन्धो, यत्र स उन~~ ईदृशः पकारो यस्य नाम्नि स उनपः, उप इतिसिद्धम्, भीमो भीमसेनवत् उप–उपाध्यायः, तस्य सम्बो० हे उनप–हे उपाध्याय ! त्वं परान्–अन्यान् । अथवा रलयोरैक्यात् ' पलं मांसं पलं मानं पलो मूर्ख' इत्यनेकार्थध्वनिमञ्जरीवचनात् पलान्–मूर्खान्, 'ईकारोऽब्जदले वाण्या 'मिति नानार्थरत्नमालावचनात् ई–वाग्, तस्या ईश्वराः–पतयः ते ईश्वरा–वागीश्वरा इत्यर्थः, अवागीश्वरान् ईश्वरीकर्तुं-वागीश्वरीकर्तुं ईश्वरः–प्रभुरित्यर्थः । अथवा ई–वाग्, तस्या ईश्वरः–पतिः स ईश्वरः–वाक्पतिरित्यर्थः । त्वं किंवि०? 'पल गता'वित्यतः 'इकिश्तिवि 'ति इप्रत्यये गत्यर्थानां ज्ञानत्वे च पलि–ज्ञानं, तस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रहो–ग्रहणं, अथवा पलिर्बुद्धिः, तस्या ग्रहो–ग्रहणं धीगुणः, उपलक्षणत्वात् धारणाहापोहादयोऽपि धीगुणाः, तेषां आरम्भ–उपक्रमः, तत्र मग्न–आस्ते यः स परिग्रहारम्भमग्नाः। त्वं पुनः किंवि० ? ता–अष्टविधा गणिसम्पत्, कविसमये लक्ष्मीसम्पदोरेकार्थत्वात्, तया राजते डप्रत्यये तारः। त्वं पुनः किंवि०? एर्विष्णुः तथा ई–श्रीः, तया युक्तः उः–शङ्करः, तयोः कथा–वक्तव्यता यत्र तत् एयुकथं–भागवतादिशास्त्रं तत् 'अयञ् गतौ' शतृप्रत्यये अयन् 'गत्यर्था ज्ञानार्था' इतिवचनात् जानन्नित्यर्थः। सु–अतिशयेन, अयन्–स्वयन्, स्वसमयवत् परसमयमपि वेत्तीतिभावः। चित्रत्वात् विसर्गाभावः। त्वं पुनः किंवि० ? 'रो ध्वना'वित्येकाक्षरवचनात् रः–शब्दः, तस्य कारणमप्युपचारात् व्याकरणादिशास्त्रमपि रः, तं 'माङ् मानशब्दयो'रिति मिमते–पठन्ति डप्रत्यये रमाः–शब्दशास्त्रादिपाठकाः शिष्या इत्यर्थः, ते विद्यन्तेऽस्येति सः रमी ॥४२॥

श्रीउपाध्यायं व्यावर्ण्य अर्थत्रयेण श्रीसाधुं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं प ! रान् ।**
**स्व ! यं दरिद्रो नपरमी श्वरीकर्तुमीश्वरः ॥४३॥**

व्याख्या—सु–शोभना, आ–श्रीर्यस्मात् सः स्वः, तस्य सम्बो० हे स्व !। परिग्रहा–दाराः, तथा 'आरम्भो वधदर्पयो' रित्यनेकार्थात् आरम्भः–षड्जीवनिकायवधः, भावे क्तप्रत्यये मग्नं–मज्जनं स्नानमित्यर्थः, तद्वत् अस्तः–क्षिप्तः, लक्षणया त्यक्तः, रलयोरैक्यात् आलयो–गृहं येन स परिग्रहारम्भमग्नास्तालय 'इ' इत्यामन्त्रणेऽव्ययः। हे प–हे प्रौढ ! त्वं युः–श्रीपृथिव्याः कं–सुखं, थो–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीत्राणं, समाहारे कथं-सुखभीत्राणं 'राङ्क् दाने' शतरि रान्-ददत् वर्त्तसे। त्वं किं कुर्वन्? 'नो बुद्धौ ज्ञानबन्धयो' रितिवचनात् ना-ज्ञानानि, तेषु परं-प्रधानं श्रुतज्ञानं, यत उक्तं च-'सव्वेसिं नाणाणं सुअनाणं चेव उत्तमं जम्हा' इतिवचनात् ततः सर्वेषु ज्ञानेषु श्रुतज्ञानमेव प्रधानं, ततो नपरं-श्रुतज्ञानं 'इङ्क्-स्मरणे' शतृ-प्रत्यये यन्-स्मरन्। त्वं पुनः किंवि०? शं-शकारं 'वाङ्क् गतिगन्धयो' रितिपाठात् वाति-गच्छति डप्रत्यये श्वः, ईदृशः रीवर्णः, तं 'कैगैरै शब्दे' इति कायति-वदति डप्रत्यये श्वरीकः, ईदृशः ऋवर्णो यस्य स श्वरीकर् 'श्रीऋ' इति सिद्धम्। तथा तुमिति वर्णं मीनाति -हिनस्ति क्विपि तुमीः, ईदृशः तथा इः-इकारस्तेन युक्तः श-शकारः, तं वर्णक्रमात् वाति-गच्छति डप्रत्यये श्वः-षकार इत्यर्थः, एवं तुमीश्वः, षिरिति सिद्धं, तेन राजते डप्रत्यये पूर्वपदेन सह कर्मधारये श्वरीकर्तुमीश्वरः-श्रीऋषिरित्यर्थः। त्वं पुनः किंवि०? पङ्क्तिरथ-न्यायात् दरिद्रः-अकिञ्चन इत्यर्थः। 'ई' इत्यव्ययः पादपूरणे। 'इ' इत्यामन्त्रणे ॥४३॥

परिग्रहारम्भमग्नास्तारये युः कथं प! रान्।
स्वयं दरि द्रो! नपरमीश्वरी कर्तुमीश्वरः ॥४४॥

व्याख्या -'ई' इत्यामन्त्रणेऽव्ययः। शसयोरैक्यात् स्वः-स्वर्गस्य द्रुः-द्रुमः, तस्य सम्बो० स्वःद्रो-हे कल्पद्रुमतुल्य! मनोवाञ्छितदायित्वात्, कस्याः? युः-श्रीपृथिव्याः-जगत इत्यर्थः। ई-श्रीः, तया युक्ता या 'ऋ पृथिव्यां देवमातरी' तिमहीपवचनात् ऋ पृथिवी, तस्याः युरिति ऋकारान्तस्य षष्ठ्या रूपसिद्धिः। हे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प–हे पवन ! अप्रतिबद्धविहारित्वात् 'रवि-पवणसमो जतो साहू' इतिवचनात् हे साधो ! भवान् रलयोरैक्यात् आलये–गृहे गृहवासे, न आस्त–नाऽतिष्ठत् । भवान् किंवि० ? अजति–गच्छति विहरतीतियावत्, न पुनरेकत्र स्थाने तिष्ठति स क्विपि अग्–स्थाने २ विहारकृदित्यर्थः । किं कुर्वाण ? इत्याह–कानां–जीवानां, इह बहुत्वनिर्देशात् सर्वजीवानां वह्निवायुनीराणां वा, थो–भीत्राणं यस्मात् यत्र वा स कथः–संयमः, सर्वजीवाऽभयदानहेतुत्वात्, तं कथं–संयमं 'राङ्क् दाने क्वचिदादानेपी'ति वचनात् शतृप्रत्यये रान्–आददानः स्वीकुर्वाण इत्यर्थः । भवान् पुनः किंवि ? स्वस्मिन् याति डप्रत्यये स्वयं–आत्मगं आत्मगतमित्यर्थः । दानि–कलत्राणि, तथा रायो–द्रव्याणि, समाहारे दरि–कलत्रद्रव्याणि 'परो दूरान्यश्रेष्ठशत्रु' ष्विति वचनात् परं–दूरं कर्तुं–विधातुं ईश्वरः–प्रभुः । दरि किंवि० ? परिग्रहो–धनधान्यादिभेदान्नवविधः, तस्य आरम्भ–उपक्रमो, यस्मात् तत् परिग्रहारम्भं । एवं सर्वाण्येतानि विशेषणानि साधावेव सम्भवन्ति, ततः स साधुरेव सम्भवति, न चान्य इति पञ्चपरमेष्ठिवर्णनम् ॥४४॥

**परिग्रहारम्भमग्नास्तार ये युः कथं प ! रान् ।**
**स्व ! यं दरिद्रोऽन ! परमीश्वरीकर्तुमीश्वरः ॥४५॥**

व्याख्या–भेषु–नक्षत्रेषु, मग्न आस्ते–तिष्ठति क्विपि भमग्नाः–चन्द्रः, तद्वत् ता–सौम्यत्वादिश्रीर्यस्य सः भमग्नास्तः, तस्य सम्बो० हे भमग्नास्त ! हे प–हे प्रौढ ! तथा सु–शोभना, आ–लक्ष्मीर्यस्मात् सेवकानां स स्वः, तस्य सम्बो० हे स्व ! । तथा न विद्यते आ–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनधान्यादिरूपा श्रीर्यस्य सः अनः, तस्य सम्बो० हे अन-हे निर्ग्रन्थ ! भवान् ईश्व आ-च ये-कामलक्ष्म्यौ तथा रलयोरैक्यात् 'पलिः संस्त्याय' इत्युणादिवचनात् पलिः-संस्त्यायः, ग्रहो-ग्रहणं परकीयवस्तूनां आदानं, तथा रलयोरैक्यात् 'आलः स्यादनर्थहरितालयो' रित्यनेकार्थात् आलः-अनर्थहेतुः हिंसालीकादिः, समाहारे पलिग्रहालं तत् 'अली भूषा-( पर्याप्ति ) निवारणेषु' इति वचनात् परोक्षायां आल-निषेधयामास । कोऽर्थः ? यः पलिग्रहालं तथा चकाराऽध्याहारात् ये-कामलक्ष्म्यौ निषेधयामास इत्यन्वयः । अर्थार्थः संस्त्यायनिषेधात् अनगार इत्यर्थः, परकीयग्रहणनिषेधात् तृतीयमहाव्रतोच्चारः, आलनिषेधात् प्रथमद्वितीयमहाव्रतोच्चारः, ये इत्यनेन कामलक्ष्मीनिषेधात् तुर्यपञ्चममहाव्रतोच्चारश्चेत्येवं पञ्चाश्रवनिषेधेन महाव्रताङ्गीकरणेन च साधुगुणवर्णनेन साधुवर्णनमिति । भवान् किं कुर्वन् ? युः-श्रीयुक्तपृथिव्याः, कं-सुखं, थो-भीत्राणं, समाहारे कथं-सुखभीत्राणं, 'राङ्क दाने' शतरि रान्-ददद्दित्यर्थः । भवान् पुनः किं कुर्वन् ? परं-श्रेष्ठं यतना यथा स्यात्तथा 'इङ्क् गतौ' शतरि यन् -विहरन्नित्यर्थः । भवान् किंवि० ? दरो-भयं विद्यतेऽस्मिन्निति दरी-भयवान् चकित इत्यर्थः, तद्वत् संसारभयचकितत्वात् द्रमति-गच्छति डप्रत्यये दरिद्रः-संसारभयचकित इत्यर्थः । भवान् पुनः किंवि० ? ईश्वरी-पार्वती, तस्याः 'कर्तुः-कर्मकर' इत्युणादिवचनात् कर्तवः-कर्मकराः अतिभक्तत्वात् सेवकाः अन्ययूथिकाः इत्यर्थः, तान् 'नो मे कप्पइ अज्जपभिइं अन्नउत्थिए' इत्यादिवचनात् मिथ्यात्वहेतुत्वात् मीनाति-निवारयति क्विपि ईश्वरीकर्तुमीः-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्राद्धजनः इत्यर्थः, तस्य ईश्वरः–स्वामी, स ईश्वरीकर्तुमीश्वरः– श्राद्धानां गुरुरित्यर्थः ॥४५॥

इत्थं श्रीजिनमतानुगामि किञ्चित् व्यावर्ण्य शिवमतमपि किञ्चित् वर्ण्यते । तत्र त्रयो देवाः ब्रह्मा विष्णुर्महेश्वरश्च । तत्र प्रथमं ब्रह्माणं वर्णयति–

परिग्रहारम्भमग्नाऽऽस्ताऽर ये युः कथं परान् ।
स्वयं दरिद्रोनपरमीश्वरीकर्तुमीश्वरः ॥४६॥

व्याख्या–'परिर्भूमि'रित्युणादिवचनात् परिः–पृथ्वी जगदितियावत्, तथा ग्रहाः-सूर्यादयः नक्षत्राणि वा,तेषां आरम्भः-प्रारम्भः निर्मापणं यावत्, तत्र मग्नः–लग्नः, तस्य सम्बो० हे परिग्रहारम्भमग्ना- सर्वपदार्थनिर्मापणसज्जेत्यर्थः । 'अः कृष्णे विनतासूना'विति महीपवचनात् अः–गरुडः, तद्वत् पीतत्वात् असीधातोर्भावे क्विपि तलि अस्ता–दीप्तिर्यस्य तस्य सम्बो० हे आस्त ! । 'इ'इत्यामन्त्रणे । हे क-हे ब्रह्मन् ! त्वं रलयोरैक्यात् पलान्-मूर्खान् 'अली भूषापर्याप्तिनिवारणेषु' इतिवचनात् अल–निवारय निषेधय । कोऽर्थः ? त्वं सर्वं करोषि, परं 'मूर्खस्य नास्त्यौषध'मिति मूर्खान् मा कुरुष्वेत्यर्थः । 'पलं मासं पलं मानं पलो मूर्खः' इति अनेकार्थध्वनिमञ्जर्याम् । त्वं किंवि० ? या–लक्ष्मीस्तस्या इनान्–स्वामिनः करोतीति णिजि क्विपि 'नाम्नो न' इति नलोपे ये इतिसिद्धम् । त्वं किंवि० ? युः 'एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वर' इतिवचनात् ई–सामर्थ्यलक्ष्मीः, तया युक्त उः–शङ्करः, स युः । पुनः त्वं किंवि० ? सु-शोभनः, 'भवेदर्विष्णु'रित्येकाक्षरवचनात् एर्विष्णुः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स इवाचरति शतरि स्वयन् 'एकमूर्तिः त्रयो देवा ब्रह्मा विष्णु-महेश्वर' इतिवचनात् स्वयन्–विष्णुरिवाचरन्नित्यर्थः। पुनः त्वं किंवि० ? द्ररिद्राः–निःस्वाः, तथा ऊनाः – कुटुम्बाद्यऽपरिपूर्णाः, तेषां मध्ये परः–उत्कृष्टः, सर्वथा दरिद्रः सर्वथा ऊनश्च तं द्ररिद्रोनपरं नरं ईश्वरीकर्तुं–अधिपतीकर्तुं ईश्वरः-प्रभुः, अचिन्त्यशक्तित्वात्। कथमित्यव्ययः सम्भवे ॥४६॥

ब्रह्माणं व्यावर्ण्य विष्णुं वर्णयति।

परिग्रहारम्भमग्नाऽऽस्ताऽऽर ये युः कथं परान्।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥४७॥

व्याख्या–'परिर्भूमि'रित्युणादिवचनात् परिः–पयोनिधिनिमग्ना पृथ्वी, तस्याः ग्रहः – ग्रहणं समुद्रात् उद्धरणमितियावत्, तस्य य आरम्भ-उद्यमः, तत्र मग्नः–सज्जस्तस्य सम्बो० हे परिग्रहारम्भमग्न!। हे अ-कृष्ण!। आ–समन्तात् असते–दीप्यते गच्छति क्विपि आ ईदृशी ता–लक्ष्मीर्यस्य तस्य सम्बो० हे आस्त! भवान् 'प्रतिपक्षः परो रिपु' रित्यभिधानचिन्तामणिवचनात् परान्–प्रतिपक्षान् कंसादीन् 'यो वातयशसोः पुंसी'तिविश्वलोचनः। ये–यशोनिमित्तात् 'कर्मयोगे सप्तमी'तिवचनात्, स्वयं–आत्मना, रलयोरैक्यात् 'अली भूषापर्याप्तिनिवारणेषु' इति परोक्षे आल–निवारयामास, केन–सुखेन, कस्यात्मनो वा, थो–भीत्राणं यथा स्यात्तथा। कथमिति क्रियाविशेषणम्। भवान् किंवि० ? परं–अन्यं, ईश्वरीकर्तुं न दरिद्रः, श्रीपतित्वात्। पुनः भवान् किंवि० ? ई–श्रीः, तस्या ईश्वरः–पतिः, सन्धौ कृते ईश्वरः। पुनः भवान् किंवि०? युः। इ–श्रीः, तया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तः उः–महेश्वरः, ‘एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वर’ इति वचनात् ॥४७॥

परिग्रहारम्भमग्नाऽऽस्ताऽऽर येयुः क! थं परान् ।
स्वयं दरिद्रो न! परमीश्वरीकर्तुमीश्वरः ॥४८॥

व्याख्या–अकन्ते–कुटिलं गच्छन्ति क्विपि अकः–कुटिलगामित्वात् वैरिणः, तेषां ‘नः पुनर्बुद्धबन्धयो’रित्येकाक्षरवचनात् नो–बन्धो यस्मात् सः, तस्य सम्बो० अग्न! । आं–जयश्रियं, अस्ते–आदत्ते क्विपि आः, ईदृशः, ‘तकारस्तस्करे युद्धे’ इतिसुधाकलशवचनात् तः-सङ्ग्रामो यस्य सः, तस्य सं०हे आस्त! । हे क-ब्रह्मन्! ‘एकमूर्तिस्त्रयोदेवा’ इतिवचनात् । दानि–कलत्राणि, ऋः–पृथिवी, तयोः इन्द्रः–स्वामी, तस्य सं० हे दरिद्र ! । चित्रत्वादनुस्वाराभावः ‘उ’ इत्यामन्त्रणे ‘नकारो जिनपूज्यो’रिति विश्वलोचनः हे न–कृष्ण ! भवान् ‘थो भीत्राणे महीध्रे’ इत्येकाक्षरवचनात् थं–महीधरं, प्रस्तावाद् गोवर्धनाख्यं रलयोरैक्यात् आल–निवारयामास । भवान् किंवि०? या–लक्ष्मीः, तां, ईयते–सेवते क्विपि येः, तथा ई-श्रीः तया युक्तः उः ‘एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वर’ इति वचनात् शङ्करो यः स युः, ततः कर्मधारये येयुरितिसिद्धम् । पुनः भवान् किंवि० ? पः–प्रौढः, रमः–प्रद्युम्नः पुत्रोऽस्यास्तीति परमी । पुनः भवान् किंवि०? परान् ईश्वरीकर्तुं–श्रीपतिकर्तुं, ईश्वरः–प्रभुः, स्वयं–आत्मना । थं किंवि० ? परि–समन्तात्, रलयोरैक्यात् ग्लयन्ति डप्रत्यये परिग्ला ईदृश्यः तथा ‘हः शूलिनि करे नीरे’इतिवचनात् अणि हाः–हस्तसम्बन्धिन्यः ‘हम्भारम्भे गो’रित्यभिधानचिन्तामणि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनात्, आ–समन्तात्, रम्भा गोशब्दो यासां ताः आरम्भा–गावो यस्मात् सः तं परिग्लहारम्भम्। गोविन्देन गवां रक्षार्थं गोवर्द्धनगिरिः निपतन्निवारितः इति शैवमतेऽस्तीतितद्वर्णना ॥४८॥

अर्थद्वयेन विष्णुं व्यावर्ण्य महेश्वरं वर्णयति—

**परिग्रहारमग्नास्तारयेयुः कथंपराऽन् ।**
**स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥४९॥**

व्याख्या—अस्तः–क्षिप्तः 'आ विधातरि मन्मथ' इति महीपवचनात् आ–मन्मथो येन तस्य सम्बो० हे अस्ता !। रः–कामः, तस्य यो–यमतुल्यः, विध्वंसकत्वात् तस्य सम्बो० हे रय !। अथवा आरं–अरिसमूहो गजपुषपुरानङ्गादिः, तत्र यो–यमः स तस्य सम्बो० हे आरय !। के–शिरसि 'थः पुंस्यूर्मिगिरीन्दुषु' इति नानार्थरत्नमालावचनात् थः –इन्दुः, तेन परः–प्रकृष्टः सः कथंपरः, तस्य सम्बो० हे कथंपर ! हे ईश्वरः–महेश्वर !। चित्रत्वात् विसर्गाभावः। परि-समन्तात्, रलयोरैक्यात् ग्लायति डप्रत्यये परिग्लः 'हः शूलिनि करे' इत्येकाक्षरवचनात् हः–शङ्करो यस्मात् सः परिग्लहः, ईदृशो यः 'आ विधातरि मन्मथे' इति महीपवचनात् आः–मन्मथः, तस्य 'आरम्भस्तु वधदर्पयो' रित्यनेकार्थात् आरम्भो–दर्पः, तं परिग्लहारम्भं, परं–दूरं कर्तुं स्वयं–आत्मना त्वं न दरिद्रः–समर्थ इत्यर्थः। त्वं किंभूतः ? अकते–कुटिलं गच्छति क्विपि अग-कुटिलगामी कथं न ? वैरिणामपीप्सितवरप्रदातृत्वात् सरल इत्यर्थः। पुनः किंवि०? इयुः। इः–कामस्तत्र ते लुग्वे 'ति पूर्वपदलोपात् युः–मृगयुः, सन्तापकत्वात् व्याधतुल्य इत्यर्थः। त्वं पुनः किंवि० ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अः–कृष्णः, स इवाचरति शतरि अन् 'एकमूर्तिस्त्रयो देवा ब्रह्मा विष्णुर्महेश्वरः' इति वचनात् कृष्णतुल्य इत्यर्थः। त्वं पु० किंवि०? ईश्वरी पार्वती तां ईयते–परस्त्रीगमनं त्यजेदित्यादौ गमनार्थानां सेवनार्थत्वात् सेवते क्विपि ईश्वरीः। चित्रत्वाद्विसर्गाभावः ॥४९॥

परिग्रहारम्भमग्नास्तारये युः कथं पराऽन।
स्वयं दरिद्रो नपरमीश्वरीकर्तुमीश्वरः ॥५०॥

व्याख्या––ई–श्रीः, तया युक्तः उः–शङ्करः स युः–श्रीशङ्करः। ईश्वरस्य भार्या ईश्वरी–गौरी, तस्यां भवः कप्रत्यये स ईश्वरीकः, स चासौ ऋतुः–स्त्रीधर्मश्च स ईश्वरीकर्तुः तं ईश्वरीकर्तुं–गौरीसत्कं स्त्रीधर्मं, रलयोरैक्यात् आल–विभूषयामास, अर्थात् सुरतादिक्रियया। ऋतुं किंभूतं? परि–समन्तात्, ग्लायति डप्रत्यये रलयोरैक्ये परिग्ल ईदृशः हस्य–शङ्करस्य, आरम्भो–दर्पो यस्मात् सः, तं परिग्लहारम्भम्। युः पुनः किंवि०? दरिद्रः–निःस्वः, दरिद्रकुटुम्बकान्तर्गतत्वात् यतः–हलमनुवलस्यैकोऽनड्वान् हरस्य न लाङ्गलं, क्रमपरिमिताभूमिर्जिष्णोर्नगोर्न च लाङ्गलम्। प्रभवति नाद्याप्येषां कृषिर्द्वितीयगवं विना, जगति सकले नेदृग् दृष्टं दरिद्रकुटुम्बक ॥१॥ मिति। ऋतुं किंवि०? 'नकारो जिनपूज्ययो' रितिविश्वलोचनतः नः–पूज्यः, तस्य मध्ये परः–प्रकृष्टः अगर्हणीयः इत्यर्थः, तं नपरं। ऋतुं पुनः किंवि०? स्वस्य या–तनयरूपा लक्ष्मीर्यस्मात् तं स्वयम्। त्वं किंभूतः? अकन्ते–कुटिलं गच्छन्ति क्विपि अकः-कुटिलगामित्वात् वैरिणः तेषां 'नः पुनर्बन्धबुद्धयो' रित्येकाक्षरवचनात् नः–बन्धः, तदर्थं अः–कृष्णः, तं स्तनति–त्वं वैरिबन्धं कुरु इत्यादिरूपं वदति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्विपि अग्नास्ता। पुनः त्वं किंवि० ? 'या तु यातरि खट्वाङ्गे याने लक्ष्म्या' मित्येकाक्षरवचनात् या-लक्ष्मीः, तस्याः इनं-स्वामिनं करोति णिजि क्विपि ये इति जातं। त्वं पुनः किंवि०? परः-श्रेष्ठः। युः पुनः किंवि० ? अन्-कृष्ण इवाचरन् परश्चासौ अंश्च परान्। पुनः किंवि०? इः-कामः तदर्थं ईश्वरी-गौरी यस्य स ईश्वरः ॥५०॥

अर्थद्वयेन महेश्वरं व्यावर्ण्य तत्प्रियां पार्वतीं वर्णयति—

परिग्रहारम्भमग्नास्तारये ! युः कथं पराऽऽन्।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥५१॥

व्याख्या—रलयोरैक्यात् भीमो भीमसेनवत् तालः-मनस्तालः-पार्वतीसिंहः, तेन याति-गच्छति डप्रत्यये तालया-सिंहयाना, तत्सम्बो० हे तालये ! हे ईश्वरि-हे पार्वति ! त्वं 'अः शिव' इति विश्वशम्भुवचनात् आन्-शिवान्, रलयोरैक्यात् पल-'परस्त्रीगमनं त्यजेदि'त्यादौ गमनार्थानां सेवनार्थत्वात् भजेत्यर्थः, कर्मणि बहुवचनं पूज्यत्वात्। त्वं किंवि० ? कं-सुखं, थो-भीत्राणं, समाहारे कथं-सुखभीत्राणं, तथा चकाराध्याहारात् स्वं-धनं, या-लक्ष्मीश्च समाहारे स्वयं-धनं लक्ष्मीं च कर्तुं-निर्मातुं त्वं ईश्वरः-महेश्वरतुल्येत्यर्थः। त्वं किंवि०? परिग्रहाः-दाराः, तेषां आरम्भः-दर्पः, तस्मिन् मग्ना-निमग्ना असते-गच्छति आस्ते वा क्विपि सा परिग्रहारम्भमग्नाः। त्वं पुनः किंवि० ? इः-कामः, ई-श्रीर्वा तदर्थं उः-शङ्करो यस्याः सा युः। त्वं पुनः किंवि० ? न दरिद्रा-नकारस्य निषेधार्थत्वान् अदरिद्रेत्यर्थः। 'उ' इत्यामन्त्रणेऽव्ययः। 'इ' इतिपादपूरणे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



' स्वराः सम्बोधन–भर्त्सनानुकम्पा–पूरण–निषेधेषु ' इति गणपाठ विवरणोक्तत्वात् । स्वयं कथं च किंवि० ? परं–प्रकृष्टमित्यर्थः ॥५१॥

हरप्रियां व्यावर्ण्य हरिप्रियां वर्णयति—

परिग्रहारम्भमग्नास्ताऽऽरये युः कथं पराऽऽन् ।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥५२॥

व्याख्या—ई–लक्ष्मीः, आन्–कृष्णान्, आर–प्राप, कर्मणि पूज्यत्वात् बहुत्वम् । ई किंवि० ? परिग्रहो–धनधान्यादिः, आरम्भः –कृषिवाणिज्यादिः, तत्र भावे क्तप्रत्यये मग्नं–मज्जनं, यस्याः सकाशात् सा परिग्रहारम्भमग्ना । ई पुनः किंवि० ? अः–कृष्णः, तस्मात् तद्वत् वा असीधातोः दीप्त्यर्थस्य क्विपि तथा तलि च अस्ता-दीप्तिर्यस्याः सा अस्ता । ई पुनः किंवि०? परा श्रेष्ठा, चकाराध्याहारात् पुनः या ई–लक्ष्मीः, परं–अन्यं, ईश्वरीकर्तुं-नायकीकर्तुं स्वयं-आत्मना, दरिद्रा न भवति–निर्धना न स्यात् । परं किंवि० ? कानां–जीवानां थो–भीत्राणं, यस्मात् सः कथः, तं कथं । यत्तदोर्नित्यसंबन्धात् तस्याः ई–श्रीः, तया युक्तः ' उकारः क्षत्रिये नेत्रे हरमौलौ हरे हरा ' विति नानार्थरत्नमालावचनात् उः–कृष्णः, सः युः–श्रीकृष्णः ईश्वरः पतिर्वर्तते । ' उ ' इत्यामन्त्रणेऽव्ययः ॥५२॥

परिग्रहारम्भमग्नास्ताऽऽरये ! युः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥५३॥

व्याख्या—या ता–लक्ष्मीः, परान्–अन्यान् परिग्रहो–दाराः धनधान्यादिर्वा, तथा आरम्भो–वधः कृष्यादिर्वा, तत्र मग्नाः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान् परिग्रहारम्भमग्नान् कर्तुं-विधातुं, आर-आगता, चित्रत्वाद्-नुस्वाराभावः । 'इ' इत्यव्ययः पादपूरणे । ता किंवि० ? इः-कामः, तदर्थं उः-कृष्णो, यस्याः सा युः । ता पुनः किंवि० ? ई-श्रीः, तस्या ईश्वरः-पतिः, स ईश्वरः-श्रीपतिरित्यर्थः, तस्य भार्या ईश्वरी-श्रीपतिपत्नीत्यर्थः । यत्तदोर्नित्यसम्बन्धात् तस्या ईश्वरः-पतिः, । परं-केवलं, स्वयं दरिद्रः कथं न स्यात् ? अपि तु स्यादेवेत्यर्थः । परिग्रहारम्भपरैः या श्रीः प्राप्यते, तया प्रायः पापमेव जायते, ततस्तस्याः पतिः दरिद्रो भवतीति भावार्थः ॥५३॥

लक्ष्मीं वर्णयित्वा सरस्वतीं वर्णयति—

**परिग्रहारम्भमग्नास्ताऽर ये ! युः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥५४॥**

व्याख्या—'यो वेधसि यम' इतिवचनात् यो-ब्रह्मा, तस्याऽपत्यं 'अत इञ्' इति इञ्प्रत्यये यिः-सरस्वती, तस्य सम्बो० हे ये-हे सरस्वति ! त्वं ई-श्रीः, तया युक्ता ऋ-पृथिवी, तस्या युः-श्रीपृथिव्याः 'पलं मांसं पलं मानं पलो मूर्ख' इत्यनेकार्थध्वनिमञ्जरीवचनात् रलयोरैक्याच्च पलान्-मूर्खान्, अल निवारयेत्यर्थः । त्वं किंवि० ? परिग्रहाः-दारास्तेषु असते-दीप्यते क्विपि परिग्रहाः, ऋ-पृथिवी, तस्यां अं-परब्रह्म, तथा भः प्रभावः, तत्र मग्ना या सा रम्भमग्ना आसते-आगच्छति क्विपि आः-आगच्छतीत्यर्थः । ईदृशी ता-लक्ष्मीर्यस्याः सा आस्ता । सरस्वतीप्रसादात् पद्माप्यागच्छतीत्यर्थः । त्वं पुनः किंवि० ? स्वस्मिन् यातीति डप्रत्यये स्वयः, तं स्वयं-आत्मगं स्वाश्रितमितियावत्, रलयोरैक्यात् पलं-मूर्खं, 'ईकारोऽञ्ज

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दले लक्ष्म्यां वाण्या'मिति नानार्थरत्नमालावचनात् ई–वाग्, तस्या ईश्वरः-पतिः, स ईश्वरः-वागीश्वरः इत्यर्थः। ईश्वरीकर्तुं-वागीश्वरीकर्तुं ईश्वरः प्राग्वत्। वागीश्वरः बृहस्पतितुल्येत्यर्थः। 'उ' इत्यामन्त्रणे। हे ये ! त्वं पुनः दरिद्रा न भवसीत्यर्थः। लक्ष्मीस्तु दीयमाना दरिद्रा भवतीत्यर्थः। 'दृश्यते त्वक्षयः कोशः साक्षाद् ब्राह्म्याः न तु श्रियः' इतिवचनाद् न दरिद्रा भवसीत्यर्थः। कथमित्यव्ययः सम्भवे ॥५४॥

सरस्वतीं वर्णयित्वा तज्जन्यं ज्ञानं वर्णयति–

परिग्रहारम्भमग्नास्तारये युः कथं परान्।
स्वयं दरिद्रो ! न ! परमीश्वरी कर्तुमीश्वरः ॥५५॥

व्याख्या—'नो बुद्धौ ज्ञानबन्धयो'रिति सुधाकलशवचनात् नो–ज्ञानं, तस्य सम्बो० हे न–हे ज्ञान ! ताः–तस्कराः मुक्तिसुखधनाऽपहारकत्वात् कषायादयः, तेषां अरिः–प्रतिपक्षः विनाशकत्वात्, तस्य सम्बो० तारे ! ए ऐ हे हैवदामन्त्रणे। दानि–स्त्रियः, तथा 'ऋ पृथिव्या'मितिमहीपवचनात् ऋ-भूः, तां यन्ति–गच्छन्ति क्विपि रितः – भूस्पृक्त्या मनुष्याः, तेषां रुः – सूर्यः 'तृतीयं लोचनं ज्ञानं द्वितीयो हि दिवाकर' इतिवचनात् सूर्यतुल्यः, तस्य सम्बो० हे दरिद्रो ! त्वं परिग्रहारम्भमग्नान् परान्–उत्कृष्टान्, कर्तुं–निर्मातुं ईश्वरोऽसि–प्रभुरसीत्यर्थः। चित्रत्वादनुस्वाराभावः। त्वं किंवि० ? 'ई भुवि श्रियामिति महीपवचनात् ई–पृथिवी तस्या उः–नेत्रं 'तृतीयं लोचनं ज्ञान'मितिवचनात् नेत्रतुल्य इत्यर्थः। स युः। त्वं किं कुर्वन् ? परं–अन्यं, सु–अतिशयेन, अयन् गत्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थानां ज्ञानार्थत्वात् विदन् पराऽभिप्रायं जानन्नित्यर्थः । त्वं पुनः किंवि० ? 'रीर्भ्रम' इत्येकाक्षरवचनात् रीः—भ्रान्तिः न रीः अरीः, सु-शोभनः, अरीः—निश्चयः, तं ईयते—गत्यर्थानां ज्ञानार्थत्वात् जानाति क्विपि श्वरीः 'विज्जा निच्छयसारा' इतिवचनात् सुनिश्चय-ज्ञातेत्यर्थः । चित्रत्वाद्विसर्गाभावः । 'ई' पादपूरणेऽव्ययः । स्वय-मात्मनेत्यर्थः ॥५५॥

ज्ञानं वर्णयित्वा कामं वर्णयति—

परिग्रहारम्भमग्नास्तारये युः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥५६॥

व्याख्या—इः—कामः, तस्य सम्बो० हे ए—हे काम ! त्वं परान् —अन्यान्, परिग्रहाः—दाराः, तेषां आरम्भ—उपक्रमः, तत्र मग्ना—निमग्नाः, तान्—परिग्रहारम्भमग्नान्—दारोपक्रमनिमग्नान् कर्तुं कथं न ईश्वरोऽसि ? काक्वा ईश्वरोऽसीत्यर्थः, स्वयमात्मना । चित्रत्वा-दनुस्वाराभावः । त्वं किंवि० ? ता-श्रीः, तस्यां 'रुहं जन्मनी' तिवचनात् रूढो—जातः डप्रत्यये तारः—श्रीनन्दन इत्यर्थः । त्वं किंवि० ? ई-श्रीः स्वजननी, तद्वत् मान्यतया उः—कृष्णो, यस्य स युः । तस्य लक्ष्मीवत् कृष्णोऽपि मान्य इत्यर्थः । त्वं पुनः किंवि० ? परः—प्रतिपक्षः, तथा 'मीग्श् हिंसाया'मिति क्विपि मीः—हिंसकः, ईदृशः ईश्वरो—महादेवो विद्यते यस्येति स इन्प्रत्यये परमीश्वरी । त्वं पुनः किंवि० ? दानि—कलत्राणि, ऋ—भूः, तां यन्ति गच्छन्ति क्विपि रितो—मनुष्याः तेषां रा—दीप्तिर्यस्मात् स दरिद्रः ॥५६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहारम्भमग्नास्तारये युः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥५७॥

व्याख्या–'ईश्वरः स्वामिनि शिवे मन्मथ' इत्यनेकार्थात् ईश्वरः –कामः, परिग्रहाः-दाराः, तेषां आरम्भस्तु वधदर्पयोरित्यनेकार्थात् आरम्भो-दर्पः तत्र मग्ना असते दीप्यते क्विपि आरम्भमग्नाः, ईदृशी तारा–कनीनिका, तया परिग्रहारम्भमग्नास्तारया-स्त्रीणां गर्वाश्रित-दृष्ट्या, ई प्रत्यक्षे, परान्–अन्यान्, रलयोरैक्यात् पलान् मूर्खान् वा, ईश्वरः–कामो, विद्यते येषु ते ईश्वरिणः–कामिनः इत्यर्थः, ईश्वरीकर्तुं–अकामिनः कामिनः कर्तुं स्वयं दरिद्रो–निःस्वो लक्षणया क्षीणो न भवति। परं केवलमित्यर्थः । ईश्वरः किंवि० ? ई–लक्ष्मीः, तस्या 'उकारः क्षत्रिये नेत्रे' इति नानार्थरत्नमालातः उः–नेत्रतुल्यः, पुत्रत्वात् यः स युः । कथमिति सम्भवेऽव्ययः ॥५७॥

परिग्रहारम्भमग्नास्तारये युः कथं परान् ।
स्वयं दरिद्रो नपरमीश्वरीकर्तुमीश्वरः ॥५८॥

व्याख्या–ता-श्रीः, तस्यां रलयोरैक्यात् लयो-ध्यानविशेषो, यस्य सः तस्य सम्बो० हे तालय ! 'रः स्मर' इतिवचनात् रः-कामः, तस्य सम्बो०हे र-हे काम ! त्वं ऊन्–शङ्करान्, 'ई' निषेधार्थेऽव्ययः, पल गतौ च । ततः ई पल–मा गच्छेत्यर्थः, कर्मणि बहुत्वं एकादशरुद्रग्रहणपरं, तत एकादश रुद्रानऽपि मा गच्छेत्यर्थः । रुद्रो हि तव प्रतिपक्षः । ततस्तत्र गते न कश्चिद् गुणो भविष्य-तीति मा गच्छेत्युक्तमिति । ऊन् किंवि०? परि–सामस्त्येन,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रहो यः 'कामग्गहो दुरप्पा' इति वचनात् सः परिग्रहः, ईदृशः यः 'आ विधातरि मन्मथ' इति महीपवचनात् आ-कामः, तस्य 'आरम्भस्तु वधदर्पयो' रिति आरम्भो-वधः, तत्र मग्ना–आसक्ताः तान् परिग्रहारम्भमग्नान् । चित्रत्वादनुस्वाराभावः । ऊन् पुनः किंवि०? आन्–'एकमूर्तिस्त्रयो देवा' इतिवचनात् कृष्णानित्यर्थः । त्वं किंवि० युः । व्याख्या तु प्राग्वत् । त्वं किंवि०? दं–कलत्रं, तदेव 'ऋ पृथिव्या'मिति महीपवचनात् ऋ-भूमिः स्थानकमित्यर्थः, तां एति–गच्छति क्विपि दरित्–स्त्रीस्थानकयायीत्यर्थः । अपरं अधुनार्थे विश्वकोषेऽस्ति । कथमिति सम्भवेऽव्ययः । 'स्वराः सम्बोधनभर्त्सनानुकम्पापूरणनिषेधे'ष्विति गणपाठविवरणे ॥५८॥

अर्थत्रयेण कामं व्यावर्ण्य तज्जेतारं श्रीहीरविजयसूरीन्द्रं वर्णयति

**परिग्रहारम्भमग्नास्ता रयेऽयुः क ! थं प ! रान् ।**
**स्व ! यं दरिद्रोनपरमीश्वरीकर्तुमीश्वरः ॥५९॥**

व्याख्या—रलयोरैक्यात् 'पल गतौ' इत्यस्य 'इकि स्तिवि' ति इप्रत्यये पलिर्भ्रमिः भवभ्रमणमिति यावत्, ग्लायति–हृ-स्वीकरोति डप्रत्यये पलिग्लः । तथा आ–आकारस्तं असते–गच्छति स्वरक्रमात् यः क्विपि आः–इकार इत्यर्थः, हृ इति वर्णे असौ इकारो यस्य स हाः । अत्र इकारस्य हृस्वत्वं हृस्वेकारस्य दीर्घताकरणार्थं, तेन हा इत्यस्य ही इति सिद्धं, ईदृशो रकारो यस्य नाम्नि सः हारः–हीर इत्यर्थः, भीमो भीमसेनवत् हीरः–हीरविजयसूरीन्द्रः, पलिग्लश्चासौ हारश्च पलिग्लहारः तं पलिग्लहारं–भवभ्रमणहरं हीरविजयसूरीन्द्रं, अहं रये–' परस्त्रीगमनं त्यजेदि'त्यादौ गमना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थानां सेवनार्थत्वात् सेवे इत्यर्थः । हे स्व—हे आत्मीय ! हे प—हे प्रौढ ! हे क—मित्र ! यं सूरीन्द्रं अहं 'राङ्क आदानेपी'ति वचनात् शतृप्रत्यये रान्—गृह्णन् अङ्गीकुर्वन्, ई—श्रीः, तया युक्ता ऋ—भूमिः, तस्याः युः—श्रीभूमेः, ईश्वरो—नाथो भवामि 'यत्र नान्यत्क्रियापदं तत्रास्ति भवतीति क्रियापदं प्रयोक्तव्य'मिति। यं किंवि०? दरिद्रा—निःस्वाः तथा ऊनाः—कुटुम्बाद्यपरिपूर्णाः, ईदृशाः पराः—प्रतिपक्षाः यस्य सः दरिद्रोनपरः तं दरिद्रोनपरम् । यं पुनः किंवि०? ईश्वरः स्वामिनि शिवे मन्मथ' इतिवचनात् ईश्वरः—कामोऽस्यास्तीति ईश्वरी—कामी, तथा इः—कामः, तौ 'कर्तुः कर्मकर' इत्युणादिवचनात् कर्तू—कर्मकरौ यस्य सः तं ईश्वरीकर्तुं । यं किंवि० ? थं—भीत्राणमित्यर्थः । अहं किंवि० ? भः—प्रभावः, तत्र मग्नः सः भमग्नः—प्रभावयुक्त इत्यर्थः, अस्तं—मरणं, अस्यति—क्षिपति क्विपि अस्ताः—मृत्युभयरहित इत्यर्थः, भमग्नश्चासौ अस्ताश्च भमग्नास्ताः। अहं पुनः किंवि० ? एः—विष्णुस्तद्वत् मिथ्यात्वहेतुत्वात् हेयतया उः—शङ्करो यस्य सः अयुः ॥५९॥

तत्पट्टपूर्वाद्रिप्रभाकरं श्रीविजयसेनसूरीन्द्रं वर्णयति ।

**परिग्र ! हारम्भ ! मग्नास्तारये युः कथं प ! रान् ।**
**स्वयं दरिद्रोन ! परमीश्वरीकर्तुमीश्वरः ॥६०॥**

व्याख्या—'परिर्भूमिरि'त्युणादिवचनात् परिं—भूमिं गृह्णाति—दुर्गति कूपे पतन्तीं समुद्धरतीति डप्रत्यये परिग्रः, तस्य सं० हे परिग्र—जगदुद्धारक ! भातीति डप्रत्यये भः—राजमानः, तस्य सं० हे भ—हे राजमान ! अरं—अत्यर्थं । क्व ? मग्नं भावे क्तप्रत्यये मज्जनं,—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नानं, तद्वत् अस्तः—क्षिप्तः त्यक्त इत्यर्थः, रलयोरैक्यात् आलयो गृहं येन सः मग्नास्तालयः। अतः त्यक्तमज्जनत्वात् त्यक्तगृहत्वात् अनगार इत्यर्थः, तस्मिन् मग्नास्तालये जातेरैक्यात् अनगारेष्वित्यर्थः। हे क—हेमित्र! कस्याः ? युः—श्रीभूमेः, ई श्रीः, तया युक्ता 'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋर्भूमिः, तस्याः, षष्ठ्यां युरिति सिद्धम्। हे प—हे प्रौढ !। सं—सकारं अवति—रक्षति क्विपि सूः, ईदृशो यः एकारः, तस्मात् अकारेण युक्तो नकारो यस्य नाम्नि सः स्वयन् सेन इत्यर्थः, भामा सत्यभामावत् सेनः-विजयसेन इत्यर्थः, तस्य सं० हे स्वयन्—हे विजयसेन! दरितान्—चकितान् करोति णिजि क्विपि दरित्, ईदृशो यो रः-स्मरः तेन ऊनो—हीनो यः सः दरिद्रोनः, तस्य सं० दरिद्रोन—भयकृत्स्मररहित ! त्वं ईः—श्रीः कर्तुं ईश्वरः—प्रभुरित्यर्थः। क्व ? शसयोरैक्यात् स्वः—भवान्तरे इत्यर्थः। ई इत्यत्र चित्रत्वाद्विसर्गाभावः। त्वं किं कुर्वन् ? 'थो भवेद्भयरक्षणे भूधरे च तथा भारे' इति सुधाकलशवचनात् थं—भारं, 'राङ् दाने क्वचिदादानेपी'ति वचनात् शतरि रान्—आददानः बिभ्रदित्यर्थः त्वं किंवि० (हरिः) चन्द्र इतिवचनात् हरेः—चन्द्रस्य—चन्द्रगच्छस्यायं—हारः, तं हारं—चन्द्रगच्छसम्बन्धिनमित्यर्थः। थं पुनः किंवि० ? परं—प्रशस्तं, न तु ऐन्धनादिभारवदप्रशस्तम्। 'ई' इत्यव्ययः सम्बो०। स्वयमित्यत्र 'यमा यपेऽस्ये 'ति सूत्रेण स्वयन् इतिसिद्धम् ॥६०॥

श्रीहीरविजयसूरीन्द्रं व्यावर्ण्य तत्प्रतिपत्तिकरं श्रीअकबरनृपं वर्णयति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिग्रहारम्भमग्नास्ताऽऽर ये युः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥६१॥

व्याख्या— अक् शब्दस्य नो–बन्धस्तत्र अस्तः–क्षिप्तः, अकारो यस्य नाम्नि सः अग्नास्ताः 'अकः' इति सिद्धं, भीमो भीमसेनवत् अकः–अकबरः, तस्य सम्बो० हे अग्नास्ता–हे अकबर! भवान् युः। ई–श्रीः, तया युक्ता 'ऋ पृथिव्या' मितिवचनात् ऋ–भूमिः, तस्याः युः–श्रीभूमेः परान्–प्रतिपक्षान्, स्वयमात्मनेत्यर्थः, 'अली भूषापर्याप्तिनिवारणे' ष्विति परोक्षायां रलयोरैक्यात् आल-निवारयामास 'यो वात–यशसोः पुंसी'ति विश्वलोचनतः ये–यशोनिमित्तं, 'निमित्तात् कर्मयोगे सप्तमी'। भवान् किंवि०? परिग्रहाः–परेषां दाराः, 'आरम्भस्तु वधदर्पयो'रिति आरम्भः–जीवानां वधः, समाहारे परिग्रहारम्भं 'परो दूरान्यश्रेष्ठशत्रु'ष्विति परं–दूरं, कर्तुं–विधातुं, ईश्वरः–प्रभुरित्यर्थः। भवान् किंवि०? न दरिद्रः– नकारस्य निषेधार्थत्वात् अदरिद्र इत्यर्थः। भवान् पुनः किंवि०? इ–श्रीः, तथा 'ईश्वरः स्वामिनि शिवे मन्मथ' इति ईश्वरः–कामः, ई च ईश्वरश्च ईश्वरौ–अर्थकामौ तौ विद्येते यस्येति स ईश्वरी–अर्थकामवानित्यर्थः। केन–सुखेन, थो–भीत्राणं यथा स्यात्तथा। कथमिति क्रियाविशेषणम् ॥६१॥

श्रीअकबरनृपं व्यावर्ण्य साधारणनृपं वर्णयति—

परिग्रहारम्भमग्नास्तारये युः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥६२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या–'ता महीलक्ष्म्यो' रित्यनेकार्थात् ता–मही, तया राजते डप्रत्यये तारः–नृपः, 'परिर्भूमि' रित्युणादिवचनात् परिर्भूमिः, तस्याः ग्रहो – ग्रहणं, तस्य आरम्भ–उद्यमस्तं परिग्रहारम्भं, तथा युः–श्रीभूमेः, कं–सुखं, थो–भीत्राणं, समाहारे कथं–सुखभीत्राणं परं–प्रकृष्टं, कर्तुं ईश्वरः–प्रभुः। तथा परान्–अन्यान्, सु–अतिशयेन, अयन्–गत्यर्थानां ज्ञानार्थत्वात् स्वयन्–उपलक्षयन् ईदृशो नृपः दरिद्रो न भवति। चकाराध्याहारात् ईश्वरी-भवति। ई–श्रीश्च ईश्वरः–कामश्च ईश्वरौ, तौ विद्येते यस्मिन् स ईश्वरी। नृपो हि 'शठदमनमशठपालन'मित्यादिचिह्नधरः अर्थकामवान् भवतीत्यर्थः। तारः किंवि० ? अगन्ते–कुटिलं गच्छन्ति क्विपि अगः–कुटिलगतयो दुष्टा इत्यर्थः, तेषां नो–बन्धः, तेन असते–दीप्यते क्विपि अग्नाः–दुष्टबन्धेन दीप्तिमान् भवतीत्यर्थः। 'ए' इतिपादपूरणेऽव्ययः ॥६२॥

परिग्रहारम्भमग्नास्ता रये युः कथं परान्।
स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥६३॥

व्याख्या–'ईर्भुवि श्रिया'मिति महीपवचनात् ई-भूमिः, तस्या ईश्वरः-पतिः, स ईश्वरः–भूमीश्वरः, परान्–अन्यान्, परं-प्रकृष्टं यथा स्यात्तथा, ईश्वरीकर्तुं–भूमीश्वरीकर्तुं, न दरिद्रः, नकारस्य निषेधार्थत्वान्न दरिद्रः अदरिद्रः। अथवा 'रः तीक्ष्णे वैश्वानरे नर' इतिवचनात् रो-मर्त्यः, नकारस्य निषेधार्थत्वात् न रः-अमर्त्यः इत्यर्थः। ईश्वरः किंवि०? 'परिर्भूमि'रित्युणादिवचनात् परिर्भूमिः,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा 'ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे' इत्यनेकार्थात् ग्रहो-रणाद्यमः, तत्र मग्नः आस्ते – तिष्ठति क्विपि परिग्रहारम्भ-मग्नाः । ईश्वरः पुनः किंवि०? ताः-तस्कराः, तान् अस्यति–क्षिपति क्विपि ताः–तस्करविनाशक इत्यर्थः । ईश्वरः पुनः किंवि०? 'रा–दीप्ति 'रित्युणादिवचनाद् रा–तेजः, तया रया-तेजसा 'टोश्वि गतिवृद्ध्यो 'रिति शतरि स्वयन्-शसयोरैक्यात् प्रवर्द्धमान इत्यर्थः । ईश्वरः पुनः किंवि० ? दो-दाता चासौ रित्–मनुष्यश्च दरित् । इदं विशेषणं अमर्त्यपक्षे सम्भवति, नतु दरिद्रपक्षे । कथमिति सम्भवेऽव्ययः । 'ई' इति प्रत्यक्षेऽव्ययः । ईश्वरः पुनः किंवि०? 'ईर्भुवि श्रियामिति महीपवचनात् ई-भूमिः, तस्याः 'उकारः क्षत्रिये नेत्र' इति नानार्थरत्नमालावचनात् उः–नेत्र-तुल्यः, स युः ॥६३॥

अर्थद्वयेन राजानं वर्णयित्वा प्रवर्द्धमानं पुरुषं वर्णयति–

परिग्रहारम्भमग्नास्तार ! येयुः क ! थं प !रान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥६४॥

व्याख्या—ता–लक्ष्मीः, तया राजते डप्रत्यये तारः, तस्य सम्बो०–हे तार–हे श्रीविराजित ! हे क–हे मित्र ! हे प–हे प्रौढ ! । आ इति खेदेऽव्ययः । ना–पुमान्, ई–श्रीः, तया या–लक्ष्म्या 'टोश्वि गतिवृद्ध्यो 'रिति शतरि शसयोरैक्यात् स्वयन्–प्रवर्द्धमानः, परिग्रहाः–दाराः, तेषां आरम्भः–उपक्रमः, तं परिग्रहारम्भं परं–अन्यं स्वयं–आत्मना कर्तुं–विधातुं ईश्वरः-प्रभुः स्याद् । ना किंवि०? अकते-कुटिलं गच्छति क्विपि अग्–कुटिलगतिरित्यर्थः । आः इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खेदेऽव्ययः । ना पुनः किं कुर्वन्? आरम्भरूपं थं-भारं, 'राङ् आदानेऽपी'तिवचनात् शतरि रान्-आददानः। ना पुनः किंवि०? युः-भीमो भीमसेनवत् अहंयुः-अहङ्कृत इत्यर्थः। ना पुनः किंवि०? न दरिद्रः-नकारस्य निषेधार्थत्वात् अदरिद्रो-धनवानित्यर्थः। ना पुनः किंवि०? 'ईश्वरः स्वामिनि शिवे मन्मथ' इत्यनेकार्थवचनात् ईश्वरः-कामः, सोऽस्यास्तीति ईश्वरी-कामी कामवानित्यर्थः। कोऽर्थः? श्रिया प्रवर्द्धमानः पुरुषः प्रायः अग्-कुटिलगतिः स्यात् अहङ्कृतश्च अन्यां स्त्रियं कुरुते च इत्यादि पूर्वोक्त-विशेषणश्च स्यात्। यदुक्तं च-'प्रवर्द्धमानः पुरुषस्त्रयाणामुपघातकः। पूर्वोपार्जितमित्राणां कलत्राणां च वेश्मना'मिति ॥६४॥

प्रवर्द्धमानपुरुषं व्यावर्ण्य अथ नवग्रहान् वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं पराऽन्।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥६५॥**

व्याख्या—उपसर्गवृत्तौ परिरित्यव्ययः पूजायां वर्तते। ततः परि-शोभनो, ग्रहः-परिग्रहः, तस्य सम्बो० हे परिग्रह-हे शुभग्रह! भेषु-राशिषु मग्न आस्ते यः स क्विपि भमग्नाः। तारा-निर्मला, ई-श्रीः, तया तारया-निर्मलश्रिया हे पर-हे श्रेष्ठ! त्वं परं-अन्यं, ईश्वरीकर्तुं ईश्वरः-प्रभुरसि, स्वयमात्मना। त्वं किंवि०? न दरिद्रः-'चत्तारि दुग्गया पन्नत्ता' इतिवचनात् देवेष्वपि दुर्गताः सन्तीत्यतः त्वं अदुर्गतः इत्यर्थः। त्वं पुनः किंवि०? अः-कृष्णः, स इवाचरति शतरि अन्-कृष्णतुल्य इत्यर्थः। यथा हि लोके कृष्णः सर्वं करोति तथा त्वमपीति तदुपमो। त्वं पुनः किंवि०? ई-श्रीः, तया युक्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उः-शङ्करः, स युः-श्रीशङ्करतुल्य इत्यर्थः । यथा लोके शङ्करोऽपि सर्वं करोति तथा त्वमपीति तदुपमा । 'इ' इति सम्बोधनेऽव्ययः । कथमिति सम्भवेऽव्ययः ॥६५॥

ग्रहं वर्णयित्वा ग्रहाग्रणीं वासरमणिं वर्णयति–

**परिग्रहारम्भ ! मग्नास्तारये युः क ! थं प ! रान् ।**
**स्वयं दरिद्रोनपरमी श्वरी कर्तुमीश्वरः ॥६६॥**

व्याख्या–परि-समन्तात् चतुर्दिक्षु, ग्रहेषु-चन्द्रादिषु, अरं-अत्यर्थं भा–प्रभा यस्य स परिग्रहारम्भः, तस्य सम्बो० हे परिग्रहारम्भ ! भावे क्तप्रत्यये मग्नं–मज्जनं स्नानमित्यर्थः, तस्य असते-दीप्यते क्विपि आः, तद्भावः अस्ता–दीप्तिर्यस्मात् स मग्नास्तः, तस्य सम्बो० हे मग्नास्त-हे स्नानशुद्धिकारक ! । सूर्योदय एव स्नानस्यापि शुद्धत्वापत्तिः, न तु रात्रौ । यदुक्तं च–'नैवाहूतिर्न च स्नानं, न श्राद्धं देवतार्चनं । दानं वा विहितं रात्रौ, भोजनं तु विशेषत' ॥१॥ इति । आ–समन्तात्, 'रा दीप्ति'रित्युणादिवचनात् रा–प्रभा, तया आरया-आदीप्त्या हे प–हे प्रौढ ! । 'कः सूर्यमित्रे'त्यादिवचनात् हे क-हे सूर्य ! भवान् दरो-भयं, विद्यते येषां ते दरिणः–भययुक्ताः, ईदृशा ये नणयोरैक्यात् द्रोणाः-काकाः, तेषां परः–शत्रुः स दरिद्रोण-परः-घूक इत्यर्थः, तं दरिद्रोणपरं - घूकम् । न विद्यते या-श्रीर्यस्य सः अयः–निःश्रीक इत्यर्थः, सु–अतिशयेन, अयः-स्वयः तं स्वयं–सर्वथा निःश्रीकं कर्तुं–विधातुं, शु–परमः, अरिः-शत्रुः, तद्वत् ईयते-गच्छति क्विपि सः श्वरीः–उत्कृष्टशत्रुतुल्यो वर्तते । चित्रत्वाद्विसर्गाभावः । कोऽर्थः ? घूकं निःश्रीकं कर्तुं हे सूर्य ! भवान् परमशत्रुतुल्योऽस्ती-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यर्थः। 'ई' इत्यव्ययः पादपूरणे। भवान् किंवि० ? युः। ई-श्रीः तया युक्तः 'उकारः क्षत्रिये नेत्र' इति नानार्थरत्नमालावचनात् उः–क्षत्रियः, स युः। सूर्यस्य क्षत्रियत्वं ज्योतिःशास्त्रे प्रोक्तं, यथा–'विप्रौ शुक्रगुरू क्षत्रं कुजार्कौ शूद्र इन्दुज 'इति। भवान् किं कुर्वन् ? थं–भीत्राणं तस्करादिदुष्टसत्त्वरक्षणरूपं, 'राङ् दाने' शतरि रान्–ददद्दित्यर्थः। सूर्योदये चौरादयो न प्रभवन्तीत्यर्थः। भवान् पुनःकिंवि ? 'ईर्भुवि श्रिया'मिति महीपवचनात् ई-अवनिः, तस्या ईश्वरः-ईशः, स ईश्वरः–अवनीश इत्यर्थः। 'अवनीशो दिनमणिः तपस्वी रोहिणीप्रिय' इति वचनात् सूर्योऽवनीश इत्यर्थः। 'इ'इति सम्बोधनेऽव्ययः ॥६६॥

परिग्रहारम्भमग्नास्तारये युः कथं प ! रान्।
स्वयं द ! रिद्रो ! न ! परमी श्वरीकर्तुमीश्वरः ॥६७॥

व्याख्या—'इ' इत्यामन्त्रणेऽव्ययः। हे प–हे प्रौढ ! हे द–हे वरदायक ! 'नकारो जिनपूज्ययो'रितिविश्वलोचनतः हे न–हे पूज्य ! 'रुः सूर्ये रक्षण' इति सुधाकलशवचनात् रुः–सूर्यः, तस्य सम्बो० हे रो–हे सूर्य ! । भवान् परि–समन्तात् ये ग्रहाः–चन्द्रादयः, तेषां 'आरम्भस्तु वधदर्पयो'रित्यनेकार्थात् आरम्भः–दर्पः, तं परिग्रहारम्भं–समस्तग्रहगर्वं, रया–दीप्त्या, परं–दूरं कर्तुं ईश्वरः–प्रभुः वर्तते। भवान् किं कुर्वन् ? कः–प्रकाशः, तस्य यः थः–पर्वतः, तं कथं–उदयगिरिं 'राङ् क्वचिदादानेपी 'तिवचनात् शतरि रान्–आददानः आश्रयन्नित्यर्थः। भवान् किंवि० ? अर्क–दुःखं करोति णिजि क्विपि अग्–'भौममन्दार्कभोगीन्द्राः प्रकृत्या दुःखदा नृणा'मिति वचनाद्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुःखकृदित्यर्थः । भवान् पुनः किंवि० ? ना ' जीवमङ्गलमार्तण्डा-नुशन्ति पुरुषान् बुधाः ' इतिवचनात् ना-पुरुष इत्यर्थः । भवान् पुनः किंवि० ? अस्तं-अस्ताद्रिं, असते-गच्छति क्विपि अस्ताः । भवान् पुनः किंवि० ? ' ईर्भुवि श्रिया'मिति ई-भूमिः-जगदिति-यावत्, तस्याः ' उकारः क्षत्रिये नेत्र ' इतिवचनात् उः-नेत्रतुल्य इत्यर्थः । स युः-जगच्चक्षुरित्यर्थः । ' ऋ पृथिव्यां देवमातरी'ति-वचनात् ऋ-भूः तस्यां एति-चलति क्विपि रित्-परिभ्रमणशीलः चलज्योतिश्चक्रान्तर्वर्तीत्यर्थः । 'शुर्निशाकर' इत्येकाक्षरवचनात् शुः-चन्द्रः, तस्य ' रीभ्रम ' इतिवचनात् न विद्यते रीभ्रमो यत्र सा अरी-भ्रान्तिरहिता, ईदृशी ई-श्रीः तेजोरूपा यस्मात् स श्चरीः । चन्द्रो हि स्वीये तेजसि क्षीणे सूर्यात्तेजो गृह्णातीति भावार्थः । चित्रत्वाद्विसर्गाभावः । 'ई' इतिपादपूरणेऽव्ययः । स्वयमात्मना ॥६७॥

अर्थद्वयेन दिवाकरं व्यावर्ण्य निशाकरं वर्णयति —

**परिग्रहारम्भमग्नास्ता रयेयुः कथं परान् ।**
**स्वयं द्ररिद्रो न परमीश्वरो कर्तुमीश्वरः ॥६८॥**

व्याख्या —ई—श्रीः, तया युक्तः ' शुर्निशाकर ' इत्येकाक्षरव-चनात् शुः—निशाकरः, स चासौ अरोऽमर्त्यश्च ईश्वरः—श्रीचन्द्रदेवः, परि—समन्तात्, ये ग्रहा—मङ्गलादयः नक्षत्राणि वा, तेषां 'आरम्भस्तु वधदर्पयो'रिति आरम्भो—दर्पः, तं परिग्रहारम्भं, परं प्रकृष्टं, कर्तुं न दरिद्रः—लक्षणया श्रेष्ठ इत्यर्थः । स्वयमात्मनेत्यर्थः । अर्क—दुःखं करोति णिजि क्विपि अग्—दुःखकृत्, नकारस्य निषेधार्थत्वात्, न अग्—अदुःखकृदित्यर्थः । ' ज्ञगुरुश्वेतकिरणशुक्राः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखकरा सदे'तिवचनात् चन्द्रः सुखकृदित्यर्थः । ईश्वरः पुनः किंवि० ? असते–दीप्यते क्विपि आः–तद्भावः अस्ता –दीप्तिरित्यर्थः, आ–समन्तात्, अस्ता–दीप्तिर्यस्य स आस्तः, ईदृशः ' आ विधातरि मन्मथ ' इतिमहीपवचनात् आ–मन्मथो यस्मात् स आस्ताः । चन्द्रात् कामो हि दीप्यत इति भावार्थः । ईश्वरः श्रीचन्द्रः पुनः किंवि० ? रा–दीप्तिस्तया रया–दीप्त्या, ई–श्रीः, तया–युक्तः उः–शङ्करः, स युः । श्वेतवर्णत्वात् दीप्त्या श्रीशङ्करतुल्य इत्यर्थः । शङ्करोऽपि श्वेतवर्णोऽस्तीति तदुपमा । ईश्वरः पुनः किंवि० ? परः–प्रकृष्टः, जनानां प्रियत्वात् यः ' आ विधातरि मन्मथ ' इति आः–मन्मथः, तद्विषये अः–कृष्णः, स इवाचरति–तन्निःपादकत्वात् तत्तुल्यो भवति शतरि अन् स परान्–प्रकृष्टमन्मथस्य जनने कृष्णतुल्य इत्यर्थः । ईश्वरः श्रीचन्द्रदेव पुनः किंवि० ? ईश्वरो–महादेवः, आधारतया विद्यते यस्येति स ईश्वरी । ' ई ' पादपूरणेऽव्ययः । कथमिति सम्भवेऽव्ययः ॥६८॥

परिग्रहारम्भमग्नास्तारये युः कथं प ! रान् ।
स्वयं द ! रिद्रोन परमीश्वरीकर्तुमीश्वरः ॥६९॥

व्याख्या—'तार कोडिकोडीण' मितिवचनात् ताराणां अनेक कोटिकोटीनां या ई–श्रीः सम्पदित्यर्थः । तया तारया ताराणां सम्पदा हे प–हे प्रौढ ! । ताराणामाधिपत्यं चन्द्रस्यैवास्तीति हे चन्द्र ! । हे द ! । ' सोमसोमजमंदा हि भृगुपुत्रास्तु योषित' इतिवचनात्' हे योषित्–हे स्त्रीग्रह ! भवान् 'रः तीक्ष्णे वैश्वानरे नर' इतिवचनात् रान्–नरान् परं–प्रकृष्टं यथा स्यात्तथा ईश्वरीकर्तुं–'ईश्वरः स्वामिनि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिवे मन्मथ' इत्यनेकार्थवचनात् ईश्वरः–कामो, विद्यते येषु ईश्वरिणः–कामिनः, अकामिनः कामिनः कर्तुं, ईश्वरः–प्रभुरित्यर्थः। रान् किंवि० ? परिग्रहाः–दाराः, तेषां 'आरम्भस्तु वध–दर्पयोः त्वराया'मित्यनेकार्थात् (आरम्भः) त्वरा-उत्कण्ठा, तत्र मग्ना-आसक्ताः, तान् परिग्रहारम्भमग्नान्। चित्रत्वादनुस्वाराभावः। भवान् किंवि० ? ई–श्रीः शोभेत्यर्थः, तदर्थं उः–शङ्करो यस्य सः युः। पुनर्भवान् किंवि० ? न रः-न तीक्ष्णः, नकारस्य निषेधार्थत्वात् अतीक्ष्णः-सौम्यग्रह इत्यर्थः 'रः तीक्ष्णे वैश्वानर' इति सुधाकलशवचनात्। भवान् पुनः किंवि० ? ऋ–पृथिवी तस्यां एति–चलज्ज्योतिष्कान्तर्वर्तित्वात् चलति इतस्ततो गच्छति क्विप रित्। स्वयमात्मनेत्यर्थः। 'ई' सम्बोधनेऽव्ययः। कथमिति सम्भवेऽव्ययः ॥६९॥

परिग्रहारम्भमग्नास्तारये युः कथं परान्।
स्वयं दरिद्रोनपरमीश्वरीकर्तुमीश्वरः ॥७०॥

व्याख्या—परि-सामस्त्येन, ग्रहाः-मङ्गलादयः, 'गह अट्ठासी'ति वचनात् अष्टाशीतिसङ्ख्याकाः यस्य सः परिग्रहः, तस्य सम्बो० हे परिग्रह !। भानि-नक्षत्राणि, 'नक्खत्त अडवीसे'तिवचनात् अष्टाविंशतिसङ्ख्याकानि अश्विन्यादीनि, तेषु मग्नो-निमग्न आस्ते–तिष्ठति क्विपि भमग्नाः, तस्य सम्बो० हे भमग्नाः !। तारया 'तार कोडि-कोडीण'मितिवचनात् जातेरैक्याच्च ताराभिः, हे पर-हे श्रेष्ठ !। एतद्विशेषणत्रयेण चन्द्र एव लक्ष्यते, ततः हे चन्द्र ! भवान् नणयोरैक्यात् द्रोणाः-काकाः, तेषां 'प्रतिपक्षः परो रिपु'रितिवचनात् परः-रिपुः, सः द्रोणपरः–घूक इत्यर्थः, काकारिरितिपर्यायात्। दरो-भयं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्यते यस्मिन् स दरी–भययुक्तः। दिवा हि काकेभ्यो घूको बिभेति। ततः दरी चासौ द्रोणपरश्चेति दरिद्रोणपरः तं दरिद्रोणपरं, दिवा भययुक्तं घूकं रात्रौ ईश्वरीकर्तुं ईश्वरः-प्रभुरित्यर्थः। चन्द्रोदये हि घूकस्यैश्वर्यं भवतीत्यर्थः। भवान् किंवि०? ई-श्रीः, तदर्थं 'उकारः-क्षत्रिये नेत्रे हरमौलौ हर' इति नानार्थरत्नमालावचनात् उर्हर–मौलिर्यस्य स युः। भवान् पुनः किंवि०? अः-कृष्णः, स इवाचरति शतरि अन् 'आ विधातरि मन्मथ' इति महीपवचनात् आ-स्मरः, तत्र अन्-कृष्णतुल्य इत्यर्थः। यथा कृष्णात् काम उत्पद्यते तथा चन्द्रादपीत्यर्थः। 'इ' इति सम्बोधनेऽव्ययः। कथमिति सम्भवेऽव्ययः। स्वयमात्मनेत्यर्थः ॥७०॥

परिग्रहारम्भमग्नास्ता रयेयुः कथं परान्।
स्वयं दरिद्रोन! परमीश्वरीकर्तुमीश्वरः ॥७१॥

व्याख्या—परि-समन्तात्, 'ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे। उपरागे पूतनादावादित्यादौ विधुन्तुदे' ॥१॥ इत्यनेकार्थवचनात् ग्रहः-उपराग विधुन्तुदो वा, तस्य य आरम्भ-उपक्रमस्तत्र मग्नो-निमग्न आस्ते यः सः क्विपि परिग्रहारम्भमग्नाः, तस्य सम्बो० हे परिग्रहा-रम्भमग्नाः-हे चन्द्र!। दरो-भयं, विद्यते येषां ते दरिणः-भीतियुक्ताः, ईदृशाः नणयोरैक्यात् द्रोणाः-काकाः, यस्मात् स दरिद्रोणः, तस्य सम्बो० हे दरिद्रोण!। चन्द्रोदये हि दृप्ताः कौशिकाः काकान् भीतिभाजो विदधतीत्यर्थः। भवान् 'रा दीप्ति'रित्युणादिवचनात् रा-प्रभा, तया रया-प्रभया, परान्-अन्यान्, ईश्वरीकर्तुं-श्वेतवर्णेन महे-श्वरीकर्तुं, परं-प्रकृष्टं यथा स्यात्तथा ईश्वरः-प्रभुरित्यर्थः। कोऽर्थः? हे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्द्र ! भवान् स्वरुचा महेश्वरवर्णान् अन्यान् करोतीत्यर्थः । भवान् किंवि० ? तान्–तस्करान् अस्यति-क्षिपति क्विपि ताः । भवान् किंवि० ? ईः-कामः, तस्य युः-भीमो भीमसेनवत् मित्रयुः-मित्रवत्सल इत्यर्थः । स इयुः । कथमित्यव्ययः सम्भवे । स्वयमात्मनेत्यर्थः ॥७१॥

अर्थचतुष्केण चन्द्रं व्यावर्ण्य मङ्गलं वर्णयति—

**परिग्रहारम्भमग्नास्तार ! येयुः कथं परान् ।**
**स्वयं दरिद्रोनपरमीश्वरी कर्तुमीश्वरः ॥७२॥**

व्याख्या—'आरो वक्रो लोहिताङ्गो मङ्गलोऽङ्गारकः कुज' इत्यभिधानचिन्तामणिवचनात् आरो–मङ्गलः, तस्य सम्बो० हे आर-हे मङ्गल ! । 'नकारो जिनपूज्ययो'रितिविश्वलोचनतः ना-पूज्या, तथा असते-दीप्यते क्विपि आः, ईदृशी 'ता महीलक्ष्म्यो'रितिमहीपवचनात् ता-भूमिः स्वजननी, यस्य स नास्तः, तस्य सम्बो० हे नास्त ! । अथवा नेषु-पूज्येषु, आः-दीप्यमाना सा नाः पूज्यतमेत्यर्थः, ईदृशी ता-भूमिर्यस्य स नास्तः, तस्य सम्बो० नास्त ! । ये पुरुषाः परान्-वैरिणः, य(अ)युः-प्राप्ताः, रोद्धुमिति गम्यते । यत्तदोर्नित्यसम्बन्धात् तेषां भवान् 'परिर्भूमि'रित्युणादिवचनात् परौ-भूमौ, परि-समन्ताद्वा 'ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे' इत्यनेकार्थवचनात् ग्रहो-रणोद्यमः, तस्य 'आरम्भस्तु वधदर्पयोः त्वराया'मित्यनेकार्थात् आरम्भः-त्वरा, तं परिग्रहारम्भं–भूमौ रणोद्यमे त्वरां कर्तुं ईश्वरः-प्रभुः, स्वयमात्मनेत्यर्थः । परिग्रहारम्भं किंवि० ? दरिद्राः-दुर्गताः-निःश्रीका इत्यर्थः । तथा ऊनाः- कुटुम्बाद्यपरिपूर्णाः, ईदृशाः पराः-वैरिणो यत्र सः तं दरिद्रोणपरं । कोऽर्थः ? भौमवारे युद्धं प्रोक्तं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतः-'युद्धे च भौमो नृपदर्शनेऽर्क' इति । ततस्तत्र युद्धे कृते परे निः-श्रीकाः-कुटुम्बादिहीनाश्च भवन्तीति भावार्थः । परिग्रहारम्भं पुनः किंवि० ? कस्याऽऽत्मनः थो–भीत्राणं, यत्र स कथः, तं कथम् । भवान् किंवि०? अकं-दुःखं करोति णिजि क्विपि अग्-दुःखकृदित्यर्थः। यदुक्तं-' भौममन्दार्कभोगीन्द्राः प्रकृत्या दुःखदा नृणा'मिति । भवान् पुनः किंवि०? ना-पुरुषः 'यदुक्तं-'जीवमङ्गलमार्तण्डानुशन्ति पुरुषान् बुधा ' इति । ततो मङ्गलः पुरुषग्रहः इत्यर्थः । भवान् पुनः किंवि०? ई-श्रीः, तस्यै शु-शोभनः, रलयोरैक्यात् अली–वृश्चिकराशिः ' मेष-वृश्चिकयोर्भौम ' इति वचनात् यस्य स ईश्वली । वृश्चिकराशिगतो भौमः श्रिये स्यादित्यर्थः ॥७२॥

मङ्गलं व्यावर्ण्य बुधं वर्णयति—

परिग्रहारम्भमग्नास्तारये युः कथं प ! रान् ।

स्वयं द ! रिद्रो नपर ! मीश्वरीकर्तुमीश्वरः ॥७३॥

व्याख्या–अः—कृष्णः, तद्वत् श्यामाङ्गत्वात् श्यामा, असते–दीप्यते क्विपि आः, तद्भावः अस्ता–दीप्तिर्यस्य स आस्तः, तस्य सम्बो० हे आस्त ! हे प-प्रौढ!हे द!-'सोमसोमजमन्दा हि भृगुपुत्रास्तु योषित ' इतिवचनात् हे स्त्रीग्रह ! ' नो बुद्धौ ज्ञानबन्धयो'रिति-वचनात् नो-ज्ञानं विद्या इत्यर्थः, तत्र परः–श्रेष्ठः । यतः–'विद्यां सुराध्यापक–राजपुत्र–सितार्कवारेषु समारभेते'ति । तस्य सम्बो० हे नपर–हे विद्याश्रेष्ठ! ' मः शिवे विधौ चन्द्रे ' इति वचनात् मः–चन्द्रस्तस्य भार्या मी–रोहिणी, तस्याः ईश्वरः–पतिः सः मीश्वरः–चन्द्र एवेत्यर्थः, तस्य भार्या मीश्वरी–रोहिणी, तस्याः ' कर्तुः कर्मकर ' इत्युणादिवचनात् कर्तुः–कर्मकरः, सत्पुत्रत्वेनातिभक्त–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वात् सः मीश्वरीकर्तुः, तथा मः—चन्द्रः, तस्याऽपत्यं मिः—बुधः, स चासौ ईश्वरो—विभुश्च, सः मीश्वरः, मीश्वरीकर्तुश्चासौ मीश्वरश्चेति कर्मधारये मीश्वरीकर्तुमीश्वरः, तस्य सम्बो० हे मीश्वरीकर्तुमीश्वर ! । चित्रत्वाद्विसर्गाभावः । हे रोहिण्यतिभक्तबुधविभो ! भवान् परिग्रहः—युवतिः कन्याराशिरित्यर्थः । 'पुंस्त्रीक्रूराक्रूरा' इतिवचनाद्वा परिग्रहं—स्त्रीरूपं ईदृशं तथा चित्रत्वादनुस्वाराभावः 'रः तीक्ष्णे'इतिवचनात् रं-तीक्ष्णं क्रूरं इत्यर्थः, अरं—अक्रूरं इत्यर्थः, भं—राशिः कन्याख्यं तत् परिग्रहारम्भं कन्याभिधानं अक्रूरं राशिं आर—प्राप्त इत्यर्थः । कोऽर्थः ? 'बुधः कन्यामिथुनयो'रितिवचनात् कन्यास्वामित्वात् । बुधः कन्याराशिं प्राप्त इत्यर्थः । भवान् किंवि०? ई—श्रीः, तया ऋ—भूमिः, तस्याः युः—श्रीभूमेः कं—सुखं, थो—भीत्राणं च समाहारे कथं—सुखभयत्राणं 'राङ्दाने' शतरि रान्-ददित्यर्थः । कोऽर्थः ? सौम्यग्रहत्वात् भूमेः सुखं भीत्राणं च बुधो ददातीत्यर्थः । पुनः भवान् किंवि०? अकं—दुःखं करोति णिजि क्विपि अग्-दुःखकृत्, नकारस्य निषेधार्थत्वात् न अग्—अदुःखकृत्, सौम्यग्रहत्वात् । यदुक्तं—'भौममन्दार्कभोगीन्द्राः प्रकृत्या दुःखदा नृणाम् ज्ञगुरुश्वेतकिरणशुक्राः सुखकराः सदा' ॥१॥ इति । भवान् किंवि० ? ऋ—भूमिः, तस्यां यन्ति—गत्यर्थानां ज्ञानार्थत्वात् जानन्ति क्विपि इतो—ज्ञातारः, ईदृशाः रा—नराः, यस्मात् स रिद्रः । बुधवारे हि विद्यारम्भे नराः शास्त्रज्ञा भवन्तीत्यर्थः । स्वयमात्मनेत्यर्थः ॥७३॥

बुधं व्यावर्ण्य बृहस्पतिं वर्णयति—

**परिग्रहारम्भ ! भग्नास्तार ! येयुः कथंप ! रान् ।**
**स्वयं द्रद्रिद्रो न परमीश्वरीकर्तुमीश्वरः ॥७४॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—परिग्रहाणां–दाराणां, आरम्भः–विवाहरूपोद्यमो यस्मात् सः परिग्रहारम्भः, तस्य सम्बो० हे परिग्रहारम्भ !। गुरुवारे विवाहः स्यात्। यदुक्तं–'गुरुर्विवाहे गमने च शुक्र' इति। मग्नं भावे क्तप्रत्यये मज्जनं नाम प्रथमः शृङ्गारः, उपलक्षणत्वादन्येऽपि पञ्चदश शृङ्गारा ज्ञेयाः, तैः असते–दीप्यते क्विप मग्नाः, ईदृशी 'तारा बुद्धदेव्यां सुरगुरुस्त्रिया'मित्यनेकार्थवचनात् तारानाम्नी सुरगुरुस्त्री यस्य सः मग्नास्तारः–सुरगुरुः, तस्य सम्बो० हे मग्नास्तार–हे बृहस्पते !। हे प्र–हे प्रौढ ! ग्रहेषु गुरुत्वात्। भवान् 'ईकारोऽब्जदले लक्ष्म्यां वाण्या'मिति नानार्थरत्नमालावचनात् ई–वाणी, तया या–वाण्या, परं–अन्यं, ई–वाणी, तस्या ईश्वराः–पतयः ते ईश्वराः–वागीश्वरा इत्यर्थः। अवागीश्वरान् ईश्वरीकर्तुं–वागीश्वरीकर्तुं ईश्वरः–प्रभुः स्यात्। स्वयमात्मनेत्यर्थः। भवान् किं कुर्वन् ? ई–श्रीः, तया युक्ता या ऋ–भूमिः, तस्याः युः–श्रीभूमेः, कं–सुखं, थो–भीत्राणं समाहारे कथं–सुखभीत्राणं 'राङ् दाने' शतरि रान्–दददित्यर्थः। भवान् किंवि० ? पुमानत्यन्तमेधावी त्रयाणामश्नुते फलम्। अल्पायुरनपत्यो वा दरिद्रो वा न संशयः'॥१॥ इतिवचनात् अत्यन्तमेधावी दरिद्रो भवतीत्यत आह–भवान् न दरिद्रः –न निःस्वः। 'ई' इति सम्बोधनेऽव्ययः ॥७४॥

बृहस्पतिं व्यावर्ण्य शुक्रं वर्णयति—

**परिग्रहाऽरम्भ ! मग्नास्तारये युः कथं परान।**
**स्वयंद ! रिद्रो न परमीश्वरीकर्तुमीश्वरः ॥७५॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—'पल गतौ' इप्रत्यये भ्रमिवत् पलिशब्दोऽपि सिद्धः। ततो रलयोरैक्यात् पलिर्गमनं, तत्र ग्रहो—ग्रहणं, यस्य स पलिग्रहः, तस्य सम्बो० हे पलिग्रह ! । गमने शुक्र एव गृह्यते । यदुक्तं—'गुरुर्विवाहे गमने च शुक्र' इति । 'भोऽलिशुक्रयो' रित्येकाक्षरवचनात् भः—शुक्रः, तस्य सम्बो० हे भ—हे शुक्र ! । 'सोमसोमजमन्दा हि भृगुपुत्रास्तु योषित' इतिवचनात् हे द—हे स्त्रीग्रह ! भवान् रलयोरैक्यात् 'पल गतौ' पलन्तीत्यचि पलाः तान् पलान्—गमनकर्तॄन् पुरुषान् ईश्वरीकर्तुं कथं न ईश्वरः ? अपि तु ईश्वर एवेत्यर्थः । भवान् किंवि० ? मग्नं भावे क्तप्रत्यये मज्जनं—स्नानं, तस्मात् असते—दीप्यते क्विपि आः, तद्भावः अस्ता—दीप्तिः सुभगतेति यावत्, तां अस्यति—क्षिपति क्विपि मग्नास्ताः । शुक्रवारे स्नाने कृते दुर्भगता स्यात् । यदुक्तं—'आदित्यादिषु वारेषु तापः कान्तिर्मृतिर्धनं । दारिद्र्यं दुर्भगत्वं च कामाप्तिः स्नानतः क्रमा'दिति । भवान् पुनः किंवि० ? 'रा दीप्ति'रित्युणादिवचनात् रया—दीप्त्या, स्वः—स्वकीयः 'यो वातयशसोः पुंसी'ति विश्वलोचनात् यो—यशः, स इवाचरति शतरि स्वयन्—स्वयशस्तुल्य इत्यर्थः । 'कविरत्यन्त—धवल' इति दीप्त्या स्वयशःसदृश इत्यर्थः । स्वयमित्यस्य 'यमा यपेऽस्य'सूत्रेण स्वयन्निति सिद्धम् । एवं यथा—सम्भवमन्यत्रापि भाव्यमिति । भवान् पुनः किंवि० ? ऋद्दीनवमाता, तां स्वमातृत्वात् यन्ति—स्मरन्ति क्विपि रितो—दैत्याः, तेषु राजते-डप्रत्यये रिद्रः—दैत्यगुरुरित्यर्थः । भवान् पुनः किंवि० ? परः—शत्रुः, मः—चन्द्रो विद्यतेऽस्येति परमी—शुक्रस्य चन्द्रः शत्रुः । यदुक्तं—'रवीन्दुभौमगुरवः ज्ञशुक्रशनिराहवः । स्वस्मिन् मित्राणि चत्वारि परस्मिन् शत्रवः स्मृताः' ॥१॥ इति । भवान् पुनः किंवि० ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईकारोऽब्जदले लक्ष्म्या'मिति नानार्थरत्नमालातः ई–अब्जदलं, तद्वत् 'उकारः क्षत्रिये नेत्र' इति नानार्थरत्नमालातः उर्नेत्रं यस्य स युः। नेत्रमित्यत्रैकत्वं शुक्रस्य नेत्रैकतासूचकं लोकप्रसिद्धेरिति। 'इ' इति सम्बोधनेऽव्ययः। अरं–अत्यर्थमित्यर्थः ॥७५॥

शुक्रं व्यावर्ण्य शनिं वर्णयति—

परिग्रहा रम्भमग्नास्ताऽऽर ! येयुः कथं प ! रान्।
स्वयं दरिद्रोनपरमीश्वरीकर्तुमीश्वरः ॥७६॥

व्याख्या—ता–विमानपरिवारादिश्रीः, तया युक्तः 'आरो रीरी शनीभौम' इत्यनेकार्थवचनात् आरः–शनिः, तस्य सम्बो० हे तार–हे शने ! हे य–हे यम ! क्रूरत्वात्। हे प–हे प्रौढ ! सूर्यसुतत्वात्। भवान् भं–राशिस्तत्र मग्नो–निमग्न आस्ते–तिष्ठति क्विपि भमग्नाः–राशिस्थितः सन् 'रस्तीक्ष्णे वैश्वानरे नर'इति सुधाकलशवचनात् रं–नरं, दरिद्रोनपरं कर्तुं कथं ईश्वरो भवति–प्रभूर्भवतीत्यर्थः। दरिद्रा–निःस्वाः, तथा ऊनाः कुटुम्बादिहीनाः, तेषां मध्ये परः–उत्कृष्टः, सर्वथा दरिद्रः सर्वथा ऊनश्च तं दरिद्रोनपरं रं–नरं कर्तुं कथं ईश्वरो भवति। भवान् किंवि० ? परि–समन्तात्, ग्रहेषु असते–सर्वग्रहोपरिवर्ति (विमान) त्वात् दीप्यते क्विपि परिग्रहाः। भवान् पुनः किंवि० ? ई–भूमिः, तस्याः युः–भौमो भीमसेनवत् मृगयुः–वधक इत्यर्थः, स ईयुः। उणादिवचनात् रा–दीप्तिः, तया अः–कृष्णः, स इवाचरति शतरि अन्, सन्धौकृते रान्–दीप्त्या कृष्णतुल्यः, श्यामत्वादित्यर्थः। ई-श्रीः, तया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तः 'शुर्निशाकर' इत्येकाक्षरवचनात् शुर्निशाकरः, तस्मिन् अरिवत्–शत्रुवत् ईयते–गच्छति क्विपि ईश्वरीः। चित्रत्वाद्विसर्गाभावः। स्वयमात्मनेत्यर्थः ॥७६॥

शनिं व्यावर्ण्य स्वर्भानुं वर्णयति—

**परिग्रहारम्भमग्नास्ताऽऽरयेयुः कथं परान्।**
**स्वयं दरिद्रो नपरमीश्वरी कर्तुमीश्वरः ॥७७॥**

व्याख्या-नकारो जिनपूज्ययो'रिति विश्वलोचनतः नः–कृष्णः, तेन अस्तः–क्षिप्तः 'कंस–केशि–मुराः साल्व–मैन्द–द्विविद–राहव' इतिवचनात् यः स नास्तः, तस्य सम्बो० हे नास्त–हे राहो! 'आरो रीरी शनिर्भौम' इत्यनेकार्थवचनात् आरः– शनिः, तद्वत् या–परिवारादिसम्पत्, यस्य सः आरयः–शनिसदृशलक्ष्मीकः, तस्य सम्बो० हे आरय! भवान् 'कः सूर्यमित्रे' त्यादिसुधाकलशवचनात् कः–सूर्यः, तथा 'थः पुंस्यूर्मिगिरीन्दु'ष्वितिनानार्थरत्नमालावचनात् थः–चन्द्रः, समाहारे कथं, तत् परि–सामस्त्येन, ग्रह–उपरागस्तस्य आरम्भः–प्रारम्भो यत्र तत् परिग्रहारम्भं कर्तुं ईश्वरो–विभुरस्ति। भवान् किंवि० ? अकं–दुःखं करोति णिजिक्विपि अग्–दुःखकृत् यदुक्तं–'भौम–मन्दार्क–भोगीन्द्राः प्रकृत्या दुःखदा नृणा' मिति। भवान् पुनः किंवि०? ई–भूमिः, तस्याः युः–भीमो भीमसेनवत् मृगयुः, व्यथकत्वात् स ईयुः। भवान् पुनः किंवि० ? पा–प्रौढा, उणादिवचनात् रा–दीप्तिस्तया अन्–कृष्णतुल्यः, श्यामत्वात् सः परान्। स्वयमात्मना, न दरिद्रः–न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःस्वः, देवत्वात् । भवान् पुनः किंवि०? 'मः शिवे विधौ चन्द्रे शिरसी'त्येकाक्षरवचनात् मः–शिरः, परः–प्रकृष्टश्चासौ मश्च परमः, सो विद्यतेऽस्मिन्निति परमी । राहोः केवलं शिर एवास्तीति भावः । भवान् पुनः किंवि० ? शुर्निशाकर' इत्येकाक्षरात् शुः–चन्द्रः, तत्र अरिवत्–अमित्रवत् ईयते–गच्छति क्विपि श्वरीः । चित्रत्वाद्विसर्गाभावः ॥७७॥

परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।
स्वयं द! रिद्रो! न! परमी श्वरीकर्तुमीश्वरः ॥७८॥

व्याख्या–ग्रहो ग्रहण–निर्बन्धाऽनुग्रहेषु रणोद्यमे । उपरागे पूतनादावादित्यादौ विधुन्तुदे' ॥१॥ इत्यनेकार्थवचनात् ग्रहो–विधुन्तुदः, तस्य सम्बो० हे ग्रह–हे विधुन्तुद ! । भेषु–नक्षत्रेषु, मग्नः–निमग्नः यः चन्द्रः, तस्य अस्ता–क्षिप्ता आ–श्रीः, येन सः भमग्नास्ताः, तस्य सम्बो० हे भमग्नास्ता ! हे द–हे स्त्रीग्रह ! उक्तं च–सोम–सोमजमन्दा हि भृगुपुत्रास्तु योषित' इति । ऋर्देवमाता तां स्वमातृत्वात् एति–स्मरति क्विपि रित् । अथवा ऋ–भूमिस्तां एति–गच्छति क्विपि रित्–भुवं प्रविशन् । 'रुः–सूर्य' इति सुधाकलशात् रुः–सूर्यो यस्मात् स रिद्रुः, तस्य सम्बो० हे रिद्रो ! । राहुभयात् सूर्यः स्वमातरं स्मरति भुवं वा प्रविशतीत्यर्थः । 'नस्तु निर्बन्ध–बुद्धयो' रित्येकाक्षरवचनात् नः–सहृदय इत्यर्थः । यदुक्तं–'एकः स एव जीवति हृदयविहीनोऽपि सहृदयो राहुः । यः सकललघिमकारणमुदरं न

६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बिभर्ति दुःपूर ॥१॥ मितिवचनान्निपुण इत्यर्थः। तस्य सं० हे न–हे निपुण ! भवान् स्वयमात्मनेत्यर्थः । 'कः सूर्यमित्रे'त्यादिसुधाकलशवचनात् कः–सूर्यः तथा 'थः पुंस्यूर्मिगिरीन्दु'ष्विति नानार्थरत्नमालावचनात् थः–चन्द्रः समाहारे कथं–सूर्यशशाङ्कं, उणादिवचनात् रा–दीप्तिः, तया रया–दीप्त्या, शसयोरैक्यात् स्वस्य-आत्मनः 'रीर्भ्रम' इत्येकाक्षरवचनात् रीर्भ्रमः, ततः स्वरीकर्तुं–स्वभ्रमं विधातुं, ईश्वरः–प्रभुरित्यर्थः । अरं–अत्यर्थं । भवान् किंवि० ? पा–प्रौढा, रा–दीप्तिः, तया अः–कृष्णः, स इवाचरति शतरि अन् –कृष्णतुल्यः, श्यामत्वात् स परान् । भवान् पुनः किंवि० ? ई–भूमिः, तस्याः युर्भीमो भीमसेनवत् मृगयुः, क्रूरत्वात् स ईयुः । कथं किंवि० ? पः–प्रौढो, राः–धनं, यस्मात् यस्य वा तत् परिमहर्द्धिकं । कथं पुनः किंवि० ? परं-श्रेष्ठं कस्याः ? युः–श्रीभूमेरित्यर्थः । 'इ' पादपूरणे । पक्षान्तरे इत्यपि व्याख्येयम् । 'ई' सम्बोधनेऽव्ययः । परं–केवलं, मो–मस्तकं 'मः शिवे विधौ चन्द्रे शिरसी'तिवचनात् विद्यते यस्य सः परमी–केवलमस्तकधारीत्यर्थः । राहुः केवलं मस्तकमेव बिभर्ति, नतूदरं, यदुक्तं च–'एकः स एव जीवति हृदयविहीनोऽपि सहृदयो राहुः । यः सकललघिमकारणमुदरं न बिभर्ति दुःपूर ॥१॥ मिति ॥७८॥

अथद्वयेन राहुं व्यावर्ण्य केतुं वर्णयति—

परिग्रहारम्भमग्नास्तार ! येयुःकथंपराऽऽन् ।
स्वयं द ! रिद्रो न परमीश्वरी कर्तुमीश्वरः ॥७९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—ईर्गच्छन्—प्राप्नुवन्, एः—एकारो यस्य स येः। तथा ईः—प्राप्नुवन्, उः—उकारो यस्य सः युः, ईदृशः यथाक्रमं कः—ककारः, तथा थकारः परः—उत्तरो यस्य स थपरः—तकार इत्यर्थः। स यस्य स येयुकथपरः। कोऽर्थः? ये इति एकारं प्राप्तः ककारः। एवं के इति सिद्धम्। युरिति उकारं प्राप्तः थपरः—तकारः। एवं तुरिति सिद्धम्। एवं येयुकथपरः—केतुः तस्य सम्बो० हे येयुकथपर—हे केतो! चित्रत्वाद्विसर्गानुस्वाराभावः 'नकारो जिनपूज्ययो'रिति विश्वलोचनतः नः—पूज्यः, ग्रहान्तर्वर्त्तित्वात् तस्य सम्बो० हे न—हे पूज्य!। अः-कृष्णस्तेन शिरश्छेदात् अस्ता—क्षिप्ता, आ—समन्तात् आ—श्रीर्वा तथा उणादिवचनात् रा—दीप्तिर्यस्य स आस्तारः। अथवा अस्तं—क्षिप्तं, आरं—अरिसमूहो येन सः अस्तारः, तस्य सम्बोधनं हे आस्तार! हे अस्तार! वा। हे द-हे शुभाशुभफलदायक! भवान् परि—समन्तात्, ग्रहाणां 'आरम्भस्तु वधदर्पयो'रित्यनेकार्थवचनात् आरम्भो—दर्पः, तं परिग्रहारम्भं—सामस्त्येन ग्रहदर्पं, स्वस्मिन् यातीति डप्रत्यये स्वयं—आत्मगतं, कर्तुं—विधातुं, ईश्वरः—प्रभुरित्यर्थः। भवान् किंवि०? अकते—कुटिलं गच्छति—राशिषु विपरीतं चरति क्विपि अग्। अथवा अकं—दुःखं करोति णिजि क्विपि अग्—दुःखकृत्, क्रूरग्रहत्वात्। भवान् पुनः किंवि०? आ—श्रीः, तया अः—कृष्णः, स इवाचरति शतरि आन्-श्रिया कृष्णतुल्य इत्यर्थः। भवान् पुनः किंवि०? ऋ—भूमिः, तस्यां एति—गच्छति क्विपि रित्, ईदृशी उणादिवचनात् रा—दीप्तिर्यस्य सः रिद्रः। भवान् पुनः किंवि०? 'नकारो जिनपूज्ययो'रिति विश्वलोचनतः नः—कृष्णः, तस्य परवत्—शत्रुवत् मीनाति—हिनस्ति क्विपि परमी—शत्रुवद्विनाशकं, ईदृशं शु—शोभनं, अरिचक्रं—सुदर्शनाभिधानं यस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सः परमीश्वरी । कृष्णेन सुदर्शनचक्रेण छित्त्वा राहुः केतुश्च कृतः इति शैवमतमिति विशेषणसङ्गतिः ॥७९॥

परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥८०॥

व्याख्या—परिग्रहारम्भमग्नाः पुरुषाः परान् कथं तारयेयुः ? अपि तु न तारयेयुरित्यर्थः । तत्र दृष्टान्तमाह—स्वयं दरिद्रः पुमान् परं ईश्वरीकर्तुं ईश्वरो न भवति । मुख्योऽयमर्थः ॥८०॥

अथ सुरं वर्णयति—

परिग्रहारम्भमग्नाऽऽस्ताऽऽर ! येयुः कथं प ! रान् ।
स्वयं दरिद्रोनपरमीश्वरींकर्तुमीश्वरः ॥८१॥

व्याख्या—परिग्रहाः—दाराः, तैः यः 'आ विधातरि मन्मथ' इति महीपवचनात् आः—कामः, तत्र मग्नो—निमग्नो यः 'देवा विसयपसत्ता' इति वचनात् स परिग्रहारम्भमग्नः, तस्य सम्बो० हे परिग्रहारम्भमग्न ! 'असी गत्यादानयोश्चे'ति चकारात् दीप्त्यर्था-दसतेः क्विपि आः—दीप्यमाना, ता—श्रीर्यस्य स आस्तः, तस्य सं० हे आस्त ! । 'इ' इत्यामन्त्रणेऽव्ययः । ई—श्रीः, तया या—श्रिया हे प—हे प्रौढ ! । ऋ—देवमाता तस्याः अपत्यं अणि आरः—ऋभवः देवः, तस्य सम्बो० हे आर !—हे देव ! । अथवा 'रस्तीक्ष्णे वैश्वानरे नर' इतिवचनात् रो—नरः, न रः अरः—अमर्त्यः, तस्य सम्बो० हे अर—हे अमर्त्य ! भवान् ई—श्रीः, तया युक्ता ऋ—देवमाता, तस्याः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युः–श्रीदेवमातुः, कं–सुखं, थो–भीत्राणं, समाहारे कथं–सुखभीत्राणं 'राङ्क् दाने' शतरि रान्–ददत् स्वयं वर्तते। भवान् किंवि० ? दरिद्राः–निःस्वाः तथा ऊनाः–कुटुम्बाद्यपरिपूर्णाः, तेषां मध्ये परः–उत्कृष्टः, तं दरिद्रोनपरं–सर्वथा दरिद्रं सर्वथा ऊनं च पुरुषं ईश्वरीकर्तुं ईश्वरो–विभुरित्यर्थः ॥८१॥

अथाष्टौ दिग्पाला वर्ण्यन्ते। तत्र प्रथमं इन्द्रं वर्णयति—

परिग्रहारम्भमग्नास्तारये युः कथं परान्।
स्वयं दरिद्रो न परमी श्वरी कर्तुमीश्वरः ॥८२॥

व्याख्या—ई–श्रीः, तया युक्ता ऋद्देवमाता, तस्याः युः–श्रीदेवमातुः। केन–सुखेन, थो–भीत्राणं यथा स्यात् तथा। कथमिति क्रियाविशेषणे। शसयोरैक्यात् स्वः–स्वर्गः तस्य ईश्वरः–पतिः इन्द्रः, परान्–शत्रून्, परं–दूरं, कर्तुं ईश्वरः–विभुरित्यर्थः। तारया–दृष्टिमात्रेणेत्यर्थः। स्वयमात्मनेत्यर्थः। इन्द्रः किंवि० ? न दरिद्रः–नकारस्य निषेधार्थत्वात् अदरिद्रः–श्रीमानित्यर्थः। इन्द्रः पुनः किंवि० ? ई–श्रीः, तस्याः ईनान्–स्वामिनः करोति णिजि क्विपि 'नाम्नो न' इति न लोपे ई इति सिद्धम्। परान् किंवि० ? परिग्रहा–दाराः, तेषां आरम्भ–उपक्रमः, तत्र मग्नाः–निमग्नाः, तान् परिग्रहारम्भमग्नान्। चित्रत्वादनुस्वाराभावः। 'इ' इति पादपूरणेऽव्ययः। 'ई' इति सम्बोधने च ॥८२॥

परिग्रहारम्भ ! मग्नास्तारये युः कथं पराऽन्।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥८३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या–परिग्रहेषु–दारेषु, असते–दीप्यते क्विपि परिग्रहाः–स्त्रीषु दीप्यमाना, ईदृशी रम्भा–इन्द्राणी यस्य स परिग्रहारम्भः–इन्द्रः, इन्द्राणीपरिग्रहत्वात्। तस्य सम्बो० हे परिग्रहारम्भ–हे इन्द्र!। पः–प्रौढो, रो–वज्रं, यस्य स परः, तस्य सम्बो० हे पर–हे वज्रिन्! भवान् युः–श्रीदेवमातुः, केन–सुखेन, कं–सुखं वा, थो–भीत्राणं तत् कथं–सुखभीत्राणं परं–श्रेष्ठं, कर्तुं–विधातुं, स्वयमात्मना, ईश्वरः–प्रभुरित्यर्थः। भवान् किंवि०? मग्नं–भावे क्तप्रत्यये मज्जनं नाम प्रथमः शृङ्गारः, उपलक्षणत्वाच्चारुचीर-तिलकादयः। यदुक्तं–'आदौ मज्जन-चारुचीर–तिलक'मित्यादि व्यक्तमेव। ततः तैः असते–दीप्यते क्विपि मग्नाः, ईदृशी ता–हरिप्रिया, तस्या रलयोरैक्यात् आलयः–सद्म, तस्मिन् मग्नास्तालये–मज्जनादिशृङ्गारयुक्तायाः श्रियः सद्मनि। अः–कृष्णः, स इवाचरति शतरि अन्–कृष्णतुल्यः, भ्रातृत्वात्। कृष्णो हि इन्द्रानुजः। ततस्तदुपमा। भवान् पुनः किंवि०? नदरिद्रः। नकारस्य निषेधार्थत्वात् अदरिद्रः–श्रीमानित्यर्थः। भवान् पुनः किंवि०? 'रः तीक्ष्णे वैश्वानरे नर' इति सुधाकलशवचनात् रा–मर्त्याः, न राः अराः–अमर्त्याः, ई–श्रीः, तया शु–शोभनाः, अराः–देवाः विद्यन्तेऽस्येति स ईश्वरी ॥८३॥

अर्थद्वयेन शक्रं व्यावर्ण्य वह्निं वर्णयति–

परिग्रहारम्भमग्नाऽस्तारये युः कथं प! रान्।
स्वयं दरिद्रो! न परमी श्वरी कर्तुमीश्वरः ॥८४॥

व्याख्या–अग्नशब्दे आ–समन्तात्, अस्तः–क्षिप्तः, अर्–रेफरहित ईदृशः इः–इकारो यत्र सः अग्नास्तारिः–अग्निरिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धम् । तस्य सम्बो० हे अग्नास्तारे–हे अग्ने ! 'ए' इति सम्बोधनेऽव्ययः । ई–श्रीः, तया युक्ता ऋः–देवमाता, तस्याः युः–देवमातृतः हे प-हे प्रौढ ! जनकत्वात् । जनकत्वं च देवानां स्वाहुतिप्रक्षिप्तान्नादिदातृतया जनकत्वात् । यदुक्तं च–'जनेता चोपनेता च यस्तु विद्यां प्रयच्छति । अन्नदः प्राणदश्चेति पिता पञ्चविधः स्मृतः ॥१॥ इति । तथा जनकस्य जनन्या–ऽभ्युत्थानसत्कारादिः क्रियते । ततो जननीतो जनकः प्रौढ इति । दरो–भयं, विद्यते येषां ते दरिणः–भययुक्ता ईदृशा द्रवो–द्रुमा, यस्मात् स दरिद्रुः, तस्य सम्बो० हे दरिद्रो ! भवान् परिग्रहाः–दाराः, तेषां आरम्भ-उद्यमः कर्मेतियावत् । स परिग्रहारम्भः-दारकर्मेत्यर्थः । तं परिग्रहारम्भं-दारकर्म विवाहमित्यर्थः । परं–श्रेष्ठं, कर्तुं-विधातुं कथं न ईश्वरः ? अपि तु प्रभुरित्यर्थः । भवान् किंवि०? उणादिवचनात् रा-दीप्तिः, तया 'अः कृष्णे विनतासूना'विति महीपवचनात् अः–गरुडः, स इवाचरति शतरि रान्–पीतत्वात् दीप्त्या गरुडतुल्य इत्यर्थः । भवान् पुनः किंवि० ? 'रः तीक्ष्णे वैश्वानरे नर' इति सुधाकलशवचनात् न रा–अरा अमर्त्या इत्यर्थः । शु–शोभना अरा–देवा विद्यन्तेऽस्मिन्निति श्वरी–त्रयस्त्रिंशत्कोटिमितानां देवानां वसतिरित्यर्थः । 'ई' प्रत्यक्षेऽव्ययः । स्वयमात्मनेत्यर्थः ॥८४॥

वह्निं व्यावर्ण्य यमं वर्णयति—

परिग्रहारम्भमग्नाऽस्तार ! येयुः कथं परान् ।
स्वयं दरिद्रो नपरमीश्वरी कर्तुमीश्वरः ॥८५॥

व्याख्या—परिग्रहाः–दाराः, उपलक्षणत्वान्नरादयः । तेषां 'आरम्भस्तु वधदर्पयो' रित्यनेकार्थात् आरम्भो–वधो विनाश

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यर्थः। तत्र मग्नो–निमग्नः, तस्य सम्बो० हे परिग्रहारम्भमग्न ! अस्ताः–क्षिप्ताः–क्षयं नीताः, अरा–अमराः, उपलक्षणत्वादिन्द्रोपेन्द्रादयो, येन स अस्तारः, तस्य सम्बो० हे अस्तार ! ' यस्तु वाते यम' इति सुधाकलशवचनात् हे य–हे यम ! भवान् काः–आत्मानो जीवास्तेषां थो–भीत्राण' तं कथं–जीवभीत्राणं, कर्तुं–विधातुं, न ईश्वरः–न प्रभुः। भवान् किंवि० ? ' ईर्भुवि श्रिया'मिति महीपवचनात् ई–भूमिः, तस्याः तत्र वा युः–भीमोः भीमसेनवत् मृगयुः–वधक इत्यर्थः। भवान् पुनः किंवि० ? परान्–आत्मव्यतिरिक्तान्, अन्तयति–विनाशयति क्विपि परान्–परविनाशक इत्यर्थः। भवान् पुनः किंवि० ? दरिणी–भयवती, द्रा–निद्रा, यस्मात् स दरिद्रः। भवान् पुनः किंवि ? ' ईश्वरः स्वामिनि शिव ' इत्यनेकार्थवचनात् ईश्वरः–कामो विद्यतेऽस्मिन्निति ईश्वरी–कामीत्यर्थः। धूमोर्णास्त्रीयुक्तत्वात्। स्वयमात्मनेत्यर्थः। परं–श्रेष्ठं, यथा स्यात्तथा। परमिति क्रियाविशेषणम् ॥८५॥

यमं वर्णयित्वा नैऋतं वर्णयति—

**परिग्रहारम्भमग्नाऽस्तारयेयुः कथंप ! रान्।**
**स्वयं दरिद्रोनपरमीश्वरी कर्तुमीश्वरः ॥८६॥**

व्याख्या– ' रलयोरैक्यात् ' पलं–मांसं, वपुषि विद्यते येषां ते पलिनः–मांसोपचितदेहा नरादयः, तेषां ग्रहो–ग्रहण', तत्र तस्य वा आरम्भ–उद्यमः, तत्र मग्नो–निमग्नः स परिग्रहारम्भमग्नः, तस्य सम्बो० हे परिग्रहारम्भमग्न !। अस्त इतिशब्दस्य तं–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तकारं, अस्यति–क्षिपति क्विपि अस्ताः, ईदृशः ऋ–ऋकारः, तथा अयेयुः–येयुः शब्दवर्जितः क–व्यञ्जनककारः, संज्ञाशब्दत्वात् ककारस्य न गत्वम् तथा अर्थ–र्थवर्जितः, पः–पकारो यस्य नाम्नि सः अस्तारयेयुःकथंपः,–असृक्पः–राक्षस इत्यर्थः । तस्य सम्बो० हे अस्तारयेयुःकथंप !–हे असृक्प ! । 'नकारो जिनपूज्ययो 'रिति विश्वलोचनतः नः–पूज्यः, न नः–अनः–अपूज्यः, पलादत्वात्, तस्य सम्बो०हे अन–हे अपूज्य ! भवान् स्वे–आत्मीयास्तेषां 'यो वातयशसोः पुंसी 'ति विश्वलोचनतः यो–यशः, तं स्वयं–आत्मीयानां यशः कर्तुं–विधातुं, ईश्वरः–प्रभुः । भवान् किं कुर्वन् ? 'रलयो रैक्यात ' पलं–मांसं ' राङ्क् क्वचिदादानेऽपी'ति शतरि रान्–आददानः, परेषां पलं गृह्णानः । पुनःकिंवि० ? दानि-कलत्राणि, 'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋ–पृथिवी, तां यन्ति–गच्छन्ति क्विपि रितः–मनुष्याः, तेषां 'रः तीक्ष्णे वैश्वानरे' इतिवचनात् रः–क्रूरः, सः दरिद्रः । पुनः किंवि० ? शु–शोभना अरा–देवा विद्यन्तेऽस्येति श्वरी । अथवा शु–शोभनः, 'रलयोरैक्यात् ' अली–वृश्चिकराशिः ' अनुराधा नानीनुने ' इतिवचनात् यस्य सः श्वली । नैऋतस्य वृश्चिकराशिरित्यर्थः । 'ई ' प्रत्यक्षेऽव्ययः ॥८६॥

नैऋतं वर्णयित्वा वरुणं वर्णयति–

परिग्रहारम्भमग्नाऽस्तारयेयुः कथं प ! रान् ।
स्वयं दरिद्रोनपरमीश्वरी कर्तुमीश्वरः ॥८७॥

व्याख्या—उनशब्देन परः–प्रधानः, स उनपरः, ईदृशः तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मीवत् ईर्गच्छन्–दूरीभवन् श्–व्यञ्जनशकारो यत्र सः मीश्, ईदृशो नन्शब्दो यस्य नाम्नि स उनपरमीश्वरः। एवं रेफयोगे नकारस्य णत्वे वरुण इति सिद्धम्। तस्य सम्बो० हे वरुण !। परि समन्तात् 'देवनस्तत्पणो ग्लह्' इत्यभिधानचिन्तामणिवचनात् 'रलयोरैक्यात्' ग्लहः-पाशकपणः, तस्य य आरम्भ–उद्यमस्तत्र मग्नो–निमग्नः यः सः तस्य सम्बो० हे परिग्लहारम्भमग्न !। दुःखितानां क्रीडनं न स्मृतिगोचरीभवतीति वरुणो ह्यत्यन्तसुखितत्वादक्षपणैः कृत्वा क्रीडतीति भावार्थः। अस्तः–अस्ताद्रिः, स एव 'रलयोरैक्यात्' आलयो-वसतिर्यस्य सः अस्तालयः, तस्य सम्बो० हे अस्तालय ! 'ई' सम्बोधनेऽव्ययः। हे प–हे प्रौढ ! 'पः पाने पचने पथि प्रौढे चे'ति सुधाकलशः। दा–दानिनः, ये ऋर्देवमाता तां यन्ति-स्मरन्ति क्विपि रितो–देवा इत्यर्थः। तेषु राजते डप्रत्यये दरिद्रः, तस्य सम्बो० हे दरिद्र !। भवान् स्वं–द्रव्यं, या च–श्रीश्चेति समाहारे स्वयं–द्रव्यं श्रियं च कर्तुं ईश्वरः–प्रभुः। 'ई' इति प्रत्यक्षेऽव्ययः। भवान् किं कुर्वन् ? ई–श्रीः, तया युक्ता या 'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋ–भूमिः, तस्याः युः–श्रीभूमेः कं-नीरं, तस्मात् था–भी त्राणं, अथवा कं–सुखं, थो–भीत्राणं समाहारे कथं 'राङ् दाने' शतरि रान्–ददद्दित्यर्थः। जलोपसर्गं निवारयन्नित्यर्थः ॥८७॥

वरुणं वर्णयित्वा वायुं वर्णयति—

परिग्रहारम्भमग्नास्ताऽऽरयेयुः क ! थं परान्।
स्वयं दरिद्रो ! न ! परमीश्वरी कर्तुमीश्वरः ॥८८॥

व्याख्या—उणादिवचनात् परिः–भूमिः, तस्याः ग्रहो–ग्रहण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्बन्धानुग्रहेषु रणोद्यमे ' इत्यनेकार्थवचनात् ग्रहोऽनुग्रहो यस्मात्त सः परिग्रहः, तस्य सम्बो० हे परिग्रह ! । वातानुकूल्यादेव भूमौ निष्पत्तिरिति । 'आरम्भस्तु वधदर्पयो'रित्यनेकार्थात् आरम्भो-वधो विनाश इत्यर्थः । तत्र मग्नः–निपतितः, अस्तोऽस्ताद्रिः, उपलक्षणत्वात् पूर्वाद्रिप्रभृतयो यस्मात् स आरम्भमग्नास्तः । तस्य सम्बो० हे आरम्भमग्नास्त ! । आ–समन्तात्, रयो-वेगो यस्य स आरयः । तस्य सम्बो० हे आरय ! ' ई ' इति सम्बोधनेऽव्ययः । दरो-भयं विद्यतेऽस्यामिति दरिणी–भययुक्ता, कम्पमानत्वात् ईदृशी उणादिवचनात् द्रुः–वृक्षशाखा, यस्मात् स दरिद्रुः । तस्य सम्बो० हे दरिद्रो ! । 'नकारो जिनपूज्ययो'रिति विश्वलोचनतः हे न-हे पूज्य ! पवित्रत्वात् । ' कः सूर्यमित्रवाय्वग्निब्रह्मात्मयमकेकि'ष्विति सुधाकल-शवचनात् हे क-हे वायो ! भवान् 'थो भीत्राणे महीध्रे चे'त्येकाक्षर-वचनात् थं-महीध्रं,ई-श्रीः,तया युक्ता, 'ऋ पृथिव्यां देवमातरी'तिमहीप-वचनात् ऋ-भूमिः, तस्याः युः–श्रीभूमितः 'परो दूराऽन्यश्रेष्ठशत्रु'ष्वि-तिवचनात् परं-दूरं, कर्तुं–विधातुं, ईश्वरः–प्रभुरित्यर्थः । ' कल्पान्त-कालमरुता चलिताचलेने'तिवचनात् पवनेन पर्वता अपि दूरीक्रियन्त इतिभावः । भवान् किं कुर्वन् ? पाः–प्रौढाः, राः-वह्नयः, ते पराः तान् परान्–महावह्नीन् स्वयन् । सु-अतिशयेन, ' अयञ् गतौ'गत्य-र्थानां प्राप्त्यर्थत्वात् अयन्-प्राप्नुवन्नित्यर्थः । मित्रत्वात् श्रयन्नित्यर्थः। यदुक्तं–'वनानि दहतो वह्नेः सखा भवति मारुतः । स एव दीप-नाशाय कृशे कस्याऽस्ति सौहृद ॥१॥ मिति । स्वयमित्यस्यानुस्वारस्य नत्वे स्वयान्नेति सिद्धम् । भवान् किंवि०? शसयोरैक्यात् स्वरः-शब्दो विद्यतेऽस्मिन्निति स्वरी-शब्दवान् । अथवा स्वः-स्वर्गं यावत् ईयते-गच्छति क्विपि स्वरीः, नतु वह्निवन्मनुष्यलोकवर्त्येव । चित्रत्वाद्वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्गाभावश्च । 'ई'इति पादपूरणेऽव्ययः ॥८८॥

वायुं वर्णयित्वा वैश्रमणं वर्णयति—

**परिग्रहारम्भमग्नास्तार ! ये युः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥८९॥**

व्याख्या—परिग्रहो—रत्नरुक्मरजतादिः । तस्य य आरम्भ–उद्यमस्तत्र मग्नो–निमग्न आस्ते-तिष्ठति क्विपि परिग्रहारम्भमग्नाः । तस्य सम्बो० हे परिग्रहारम्भमग्नाः! । तां-श्रियं, राति–ददाति डप्रत्यये तारः–श्रीदः, तस्य सम्बो० हे तार-हे कुबेर ! भवान् ई–श्रीः, तया या-श्रिया, परान्-अन्यान्, ईश्वरीकर्तुं ईश्वरः–प्रभुः । भवान् किंवि०? स्वयमात्मना । न दरिद्रः । नकारस्य निषेधार्थत्वात् अदरिद्रः श्रीमानित्यर्थः । परं–श्रेष्ठमिति क्रियाविशेषणम् । भवान् पुनः किंवि० ? ई–श्रीः, तदर्थं मित्रत्वात् उः-शङ्करो यस्य सः युः । कथमिति सम्भवेऽव्ययः । 'ई' इत्यामन्त्रणेऽव्ययः ॥८९॥

वैश्रमणं वर्णयित्वा ईशानमष्टमं दिग्पालं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं परान् ।**
**स्व ! यं दरिद्रो ! न परमीश्व ! रीकर्तुमीश्वरः ॥९०॥**

व्याख्या—ईश् शब्दं अवति–रक्षति क्विपि ईशः, ईदृशः अकारो यस्य नाम्नि स ईश्वः-ईश इत्यर्थः । तस्य सम्बो० हे ईश्व-हे ईश ! । अनशब्दं पाति-रक्षति डप्रत्यये अनपः, तस्य सम्बो०हे अनप ! ईशशब्दाऽनशब्दयोः सन्धौ कृते हे ईशान ! इति सिद्धम् । अथवा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीमो भीमसेनवत् ईशः–ईशान इत्यर्थः । हे न–हे पूज्य ! इत्यपि बोध्यम् । परिग्रहाः-दाराः, तेषां आरम्भः-उद्यमः, तत्र 'देवा विसय-पसत्ता' इतिवचनात् मग्नो–निमग्नः, तस्य सम्बो० हे परिग्रहार-म्भमग्न ! । सु आ-श्रीः यस्य स स्वः, तस्य हे स्व ! । 'रलयोरैक्यात्' दलानि–पत्राणि, विद्यन्ते येषां ते दलिनः–पत्रवन्तः, ईदृशा द्रवः–द्रुमा यस्य स दलिद्रुः, तस्य सम्बो० हे दलिद्रो ! । देवानां वनानि सन्ति तेषु वृक्षाश्च ते पत्रवन्तः सन्तीतिभावः । भवान् परान्-वैरिणः 'रलयोरैक्यात्' आल-निवारयामास 'अली भूषापर्याप्तिनिवारणे'-ष्वितिवचनात् । भवान् किं०? 'पशौ यः स्या'दिति सुधाकलशवच-नाद् यं–पशुं 'रः तीक्ष्णे वैश्वानरे नर' इतिवचनात् रीकर्तुं-नरीकर्तुं, ईश्वरः-प्रभुरित्यर्थः । कोऽर्थः ? अचिन्त्यशक्तित्वात् पशुं नरीकर्तुं समर्थ इत्यर्थः । भवान् किंवि०?आ-ईषत्, स्तनति-वदति महानुभावत्वात् स्तोकं जल्पतीति क्विपि आस्ता-महानुभावः । यतो महानुभावाः स्तोकमेव वदन्ति । यदुक्तं–' महुरं निउणं थोवं कज्जावडियं च अगव्वियमतु-च्छ'मित्यादिः । भवान् पुनः किंवि० ? ई-श्रीः, तया ' उशब्दः शङ्करे तोये तोयधौ धरणीधरे' इतिविश्वशम्भुवचनात् उः-कृष्णतुल्यः, स युः। 'ई'सम्बोधनेऽव्ययः । कानां–जीवानां, थो–भीत्राणं यथा स्यात्तथा । कथमिति क्रियाविशेषणम् । भवान् पुनः किंवि० ? रमः–कामो विद्यतेऽस्मिन्निति रमी–' देवा विसयपसत्ता ' इति वचनात् कामी-त्यर्थः । रमः काम इत्यनेकार्थेऽस्ति ॥९०॥

दिग्पालान् वर्णयित्वा रामं वर्णयति—

**परिग्रहारम्भमग्नाऽस्तारये ! युः कथं परान् ।**
**स्वयं दरिद्रो नपरमीश्व ! री कर्तुमीश्वरः ॥९१॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—पः—प्रौढः, रो—वज्रं, विद्यतेऽस्येति परी—वज्री इन्द्र इत्यर्थः, तं गृह्णाति स परिग्रहः—रावणः, इन्द्रनिग्रहकारित्वात्, तस्य। 'आरम्भस्तु वधदर्पयो'रित्यनेकार्थात् आरम्भो-वधः, तत्र मग्नो-निमग्नो यः स परिग्रहारम्भमग्नः, तस्य सम्बोधनं हे परिग्रहारम्भ-मग्न ! । अस्तं—क्षिप्तं, आरं—अरिसमूहो येन स अस्तारः, ईदृशः 'यस्तु वाते यमे' इति वचनात् यः-पवनः, तस्याऽपत्यं यिः—हनुमान्, पवनसुतत्वात् यस्य सः अस्तारयिः, तस्य सम्बो० हे अस्तारये ! । दं-कलत्रं, तदिव 'ऋः पृथिव्यां देवमातरी'ति महीपवचनात् ऋ-भूमिः, तां एति-गच्छति सेवते वा क्विपि दरित्—भूधवः इत्यर्थः। तस्य सम्बो० हे दरित् ! । 'रः तीक्ष्णे वैश्वानरे नरे रामे वज्र' इति सुधा-कलशवचनात् रो—रामः, तस्य सम्बो० हे र-हे राम ! 'ईर्भुवि श्रिया' मिति महीपवचनात् ई—भूः, सैव शसयोरैक्यात् स्वं—धनं, यस्य सः ईस्वः-'भूपालो भूधनो भूभुगि'तिवचनात् भूधन इत्यर्थः। तस्य सम्बो० हे ईस्वः-हे भूधन ! भवान् कस्य-पानीयस्य 'थः पुंस्यूर्मिगिरीन्दु'ष्विति नानार्थरत्नमालावचनात् थाः—कल्लोलाः यत्र स कथः-समुद्रः, तं कथं-समुद्रं 'नो बुद्धौ ज्ञानबन्धयो'रितिवचनात् नपरं-बन्धनपरं कर्तुं—विधातुं ईश्वरो-विभुरित्यर्थः। भवान् किंवि० ? ई—श्रीः, तया युक्तः'उकारः क्ष-त्रिये नेत्रे हरमौलौ हरे हरा'विति नानार्थरत्नमालावचनात् उः-कृष्णः, शैवमते रामस्य कृष्णावतारत्वादिति युः। भवान् पुनः किंवि० ? पा-प्रौढा, उणादिवचनात् रा—दीप्तिः, तया अः-कृष्णः, स इवाचरति शतरि अन्—कृष्णतुल्य इत्यर्थः। स परान्। भवान् पुनः किंवि० ? रस्य—रामस्य, भार्या री—सीता, तामेव ईयते-गत्यर्थानां ज्ञानार्थत्वात् जानाति सेवते वा क्विपि रीः। चित्रत्वाद्विसर्गाभावः। कथं किंवि०? सु—शोभनः, अः—कृष्णः, तथा या—लक्ष्मीर्यत्र स स्वयः, तं स्वयम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ई उ इत्यामन्त्रणेऽव्ययः ॥९१॥

अथ चतुर्दश स्वप्ना वर्ण्यन्ते । तत्र प्रथमं गजस्वप्नं वर्णयति—

परिग्र! हारम्भमग्नाऽस्ताऽऽर ये युः कथं परान् ।
स्वयंदरिद्रोनपरमीश्वरी कर्तुमीश्वरः ॥९२॥

व्याख्या—'ईर्भुवि श्रिया'मिति महीपवचनात् ई–भूमिः, तस्या ईश्वरः–पतिः स ईश्वरः–भूमीश्वरः, तस्य सम्बो० हे ईश्वर–हे भूपते ! चित्रत्वाद्विसर्गाभावः । उणादिवचनात् परिं–भूमिं गृह्णाति डप्रत्यये परिग्रः, तस्य सम्बो० हे परिग्र–हे भूमिग्राहक ! 'ई' इति सम्बोधनेऽव्ययः ।

इन्द्रे–भा–ऽश्व–शुक–प्लवा–हि–पवन–स्वर्णांशु–लोकान्तरे
भारि–भ्रम–कपी–न्दु–पीत–गरुड–श्री–शुक्र–विष्णवऽर्कजैः ।
सूत–स्कन्द–शनी–श–वंश–वरुण प्राणा–ऽग्नि–भीताऽसितै–
रश्वस्त्वां हरिजैः क्रमाज्जिनपते ! त्रिशन्मितैः स्तौम्यह ॥१॥

मितिवचनात् हरिर्गजः, तस्याऽयं अणि हारः, तं हारं–गजसम्बन्धिनं ईदृशं स्व इति वर्णं याति डप्रत्यये स्वयः, ईदृशः यः न्–व्यञ्जननकारः तथा दरिद्रोनः । दरिद्रशब्देन उनः–हीनः यः पः–पकारस्तेन राजते डप्रत्यये यः सः स्वयन्दरिद्रोनपरः–स्वप्न इति सिद्धम् । ततः तं स्वयन्दरिद्रोनपरं स्वप्नं या स्त्री आर–प्राप लेभे इत्यर्थः । यत्तदोर्नित्यसम्बन्धात् सा स्त्री परान्–उत्तमान् उत्तमपुरुषान् । अथवा पाः–प्रोढाश्च ते रा–नराश्च पराः–अन्यपुरुषापेक्षया प्रौढपुरुषाः अर्हच्चक्रिप्रभृतयः, तान् परान् कर्तुं–निष्पादयितुं, ईश्वरी–समर्था स्यात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोऽर्थः? या स्त्री हारं-गजसम्बन्धिनं स्वयन्दरिद्रोनपरं स्वप्नं आरलेभे, सा स्त्री परान्-उत्तमपुरुषान् जनयितुं समर्था भवतीत्यर्थः। या स्त्री किंविशिष्टा ? भेषु-नक्षत्रेषु, मग्नः आस्ते-तिष्ठति क्विपि भमग्नाः-चन्द्र इत्यर्थः। तद्वत् ता-वदनादिश्रीर्यस्याः सा भमग्नास्ता। या पुनः किंवि० ? ई-लक्ष्मीतुल्या स्त्री, सर्वगुणोपेतत्वात्। या पुनः किंवि० ? 'ईकारोऽब्जदले लक्ष्म्यां वाण्या'मिति नानार्थरत्नमालावचनात् ई-अब्जदलं, तद्वत् 'उकारः क्षत्रिये नेत्र' इति नानार्थरत्नमालावचनात् ऊ-नेत्रे, यस्याः सा युः-अब्जदलाक्षीत्यर्थः। हारं स्वप्नं किंवि० ? केन-सुखेन, थो-भीत्राणं, यस्मात् स कथः, तं कथम् ॥९२॥

गजस्वप्नं व्यावर्ण्य वृषभं वर्णयति—

**परिग्र ! हारम्भमग्नास्ताऽऽर येयुः ! कथं परान्।**
**स्वयं दरिद्रोनपरमीश्वरी कर्तुमीश्वरः ॥९३॥**

व्याख्या—हरः-शङ्करः, तस्यायं हारः-शाङ्करः वृषभ इत्यर्थः। तं हारं-वृषभं स्वप्ने या स्त्री आर-प्राप लेभ इत्यर्थः। यत्तदोर्नित्यसम्बन्धात् सा स्त्री परान्-उत्तमपुरुषान् कर्तुं-जनयितुं, ईश्वरी स्यात्। हारं किंवि०? सुष्ठु अयते-गच्छति अचि स्वयः, तं स्वयम्। हारं पुनः किंवि० ? दरिर्गुहा, तत्र द्राति डप्रत्यये दरिद्रः-सिंहः, स एव ऊ-दया, तया ऊनो-हीनः, स ऊनः-निर्दयः, ईदृशः परः-शत्रुः, विध्वंसकत्वात् यस्य सः दरिद्रोनपरः, तं दरिद्रोनपरम्। हे परिग्र हे ईश्वर इति पदद्वयव्याख्यानं प्राग्वत्। भमग्नास्ता इति स्त्रीविशेषणं प्राग्वत् 'ई'-इति सम्बोधनेऽव्ययः। हारं पुनः किंवि० ? केन-सुखेन थो-भीत्राणं यस्मात् स कथः, तं कथं ॥९२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋषभस्वप्नं व्यावर्ण्य सिंहस्वप्नं वर्णयति—

परिग्रहेत्यादि । व्याख्या-प्रथमस्वप्नवत् सिंहस्वप्नेऽपि ज्ञेया । नवरं हरिः–सिंहः, तस्याऽयं हरिः–हरिसम्बन्धी, तं हारं–हरिसम्बन्धिनं स्वयन्दरिद्रोनपरं स्वप्नं या स्त्री आर-लेभे, यत्तदोर्नित्यसम्बन्धात् सा-स्त्री परान्–उत्तमपुरुषान् कर्तुं–जनयितुं, ईश्वरी–समर्था स्यात् ॥९३॥

सिंहस्वप्नं व्यावर्ण्य लक्ष्मीस्वप्नं वर्णयति—

परिग्रहेत्यादि । व्याख्या–प्रथमस्वप्नवत्तुर्यस्वप्नेऽपि ज्ञेया । नवरं 'इन्द्रेभाश्वशुके'त्यादिकाव्ये हरिशब्दः श्रीशब्दवाचकोऽस्ति । ततो हरिर्लक्ष्मीः, तस्याः अयं अणि हारः, तं हारं–लक्ष्मीसम्बन्धिनं स्वयन्दरिद्रोनपरं स्वप्नं इत्यर्थः, या स्त्री आर–लेभे, यत्तदोर्नित्यसम्बन्धात् सा स्त्री परान्–उत्तमपुरुषान्, कर्तुं–जनयितुं, ईश्वरी स्यात् ॥९४॥

लक्ष्मीस्वप्नं वर्णयित्वा स्रगुस्वप्नं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥९५॥**

व्याख्या—कश्चित् पुमान् जायां प्रति स्रगुस्वप्नमाहात्म्यं ब्रूते-'जनी जाया परिग्रह' इत्यभिधानचिन्तामणिवचनात् परिग्रहो–जाया, तत्सम्बोधनं हे परिग्रह–हे जाये ! । ई–श्रीः, तया युक्तः शुः–चन्द्रः, तद्वत् रः–तीव्रः, नञो योगे अरः-अतीव्रः सौम्यः, तस्य सम्बो० हे ईश्वर–हे श्रीचन्द्रसौम्य ! । चित्रत्वाद्विसर्गाभावः । अग्-शब्दस्य नो–बन्धरतेन असते–दीप्यते, तं वा असते–गच्छति वा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्विपि अग्नाः, ईदृशः स्–व्यञ्जनसकारस्तस्य ता–श्रीः शोभा, तस्यै र–व्यञ्जनरेफो यत्र शब्दे सः अग्नास्तारः स्रग् इति सिद्धम् । इह 'धुटो धुटि स्वेवे 'ति सूत्रेण विसर्गसकारलोपः । ततः अग्नास्तारः स्रग्, अये–शुभदैवे सति अर्थात् स्वप्ने दृष्टा सती 'आ विधातरि मन्मथ ' इति महीपवचनात् आ–कामः तथा 'आ श्रिया'मिति शिलोञ्छवचनात् आ–लक्ष्मीः तयोः रलयोरैक्यात् लम्भः–प्राप्तिः, तं आलम्भं–कामार्थप्राप्तिं कर्तुं ईश्वरी–समर्था स्यात् । कोऽर्थः ? हे जाये ! स्रग्–पुष्पमाला, आशब्देन कामः, तथा लक्ष्मीशब्देन अर्थः, तयोः प्राप्तिं कर्तुं तथा चकाराध्याहारात् परान्–उत्तमपुरुषान्, कर्तुं–कार्ये कारणोपचारात् जनयितुं ईश्वरी–समर्था स्यात् । स्वयमात्मनेत्यर्थः । स्रग् किंवि०? न दरिद्रा–मनोहरेत्यर्थः । स्रग् किंवि०? 'ईकारोऽब्जदले लक्ष्म्या 'मिति नानार्थरत्नमालावचनात् ई-अब्जदलं, तदेव ' उकारः क्षत्रिये नेत्र ' इति नानार्थरत्नमालावचनात् उर्नेत्रं, यस्याः सा युः । आरम्भं किंवि० ? परं–श्रेष्ठम् । कथमिति सम्भवेऽव्ययः । ' उ ' इति सम्बोधनेऽव्ययः ॥९५॥

स्रजं वर्णयित्वा शशिस्वप्नं वर्णयति—

**परिग्रहारम्भमग्नास्ताऽऽरयेयुः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥९६॥**

व्याख्या—' इन्द्रेभाश्वशुके 'त्यादिकाव्ये हरिः–चन्द्रः, तस्यायं अणि हारः, तं हारं–चन्द्रसम्बन्धिनं स्वयन्दरिद्रोनपरं स्वप्नं या स्त्री आर–लेभे, सा परान्–उत्तमपुरुषान्, कर्तुं–जनयितुं, ईश्वरीसमर्था स्यात् । शेषं प्रथमस्वप्नवत् व्याख्यानं बोध्यम् ॥९६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिनकरं वर्णयति—

परिग्रहेत्यादि । व्याख्या-दिनकरस्वप्ने हरिर्दिनकरः । शेषं प्रथमस्वप्नवत् व्याख्यानम् ॥९७॥

दिनकरं वर्णयित्वाऽष्टमे स्वप्ने केतुं वर्णयति—

**परिग्रहारम्भमग्नाऽऽस्तार ! येयुःकथं प ! रान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥९८॥**

व्याख्या—कश्चित् पुमान् जायां प्रति केतुस्वप्नमाहात्म्यं ब्रूते–हे परिग्रह–हे जाये ! 'आरम्भस्तु वधदर्पयो'रित्येकाक्षरवचनात् आरम्भो-मदस्तस्मिन् मग्नो यः सः, तस्य सम्बो० हे आरम्भमग्न ! । स्त्रियो हि प्रायो मदयुक्ता भवन्तीति भावार्थः । असन्ते–दीप्यन्ते क्विपि आसो–दीप्यमानाः 'तारो निर्मलमौक्तिक' इत्यनेकार्थवचनात् तारा–निर्मलमौक्तिकानि, यस्य स आस्तारः, तस्य सम्बो० हे आस्तार ! । हे प–हे प्रौढ ! बाल्याऽभावात् । त्वं ईयते–गच्छति क्विपि ईर्गच्छन् एः–एकारो यत्र सः येः, ईर्गच्छन् उकारो यत्र स युः, ईदृशो यथाक्रमं कः–ककारः, तथा थकारः परो–वर्णक्रमे अग्रगो यस्य सः थपरः–तकार इत्यर्थो यस्य सः येयुकथः । केतुरिति सिद्धम् । कोऽर्थः ? एकारं प्राप्तः ककारः तथा उकारं प्राप्तस्तकारः इति व्युत्पत्त्या केतुरितिसिद्धं तम् । चित्रत्वाद्विसर्गाभावः। येयुकथं-केतुं ध्वजमित्यर्थः । 'राङ् क्वचिदादानेपी'ति वचनात् शतरि रान्–गृह्णन् अर्थात् स्वप्ने स्त्रीजनः परमीश्वरीकर्तुं ईश्वरः स्यात् । कोऽर्थः? परमशब्दो विद्यते यस्मिन् स परमी–परमशब्दयुक्त ईदृशः ईश्वरशब्दो विद्यते यस्मिन् स परमीश्वरी–परमेश्वर इति सिद्धम् । अपरमेश्वरान् परमी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्वरीकर्तुं-परमेश्वरं विधातुमित्यर्थः। स्वप्ने केतुं गृह्णन् स्त्रीजनः तीर्थकरं निष्पादयितुं समर्थो भवतीति भावार्थः। त्वं किंवि० ? न दरिद्रः-नकारस्य निषेधार्थत्वात् अदरिद्रः-मनोहर इत्यर्थः ॥९८॥

ध्वजं वर्णयित्वा कुम्भं वर्णयति—

परिग्रहाऽऽरम्भमग्नास्ताऽऽरयेयुः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥९९॥

व्याख्या—कश्चित् पुमान् जायां प्रति कुम्भस्वप्नमाहात्म्यं ब्रूते-हे परिग्रह-हे जाये ! । 'आकारस्तु घटे भाव' इति नानार्थरत्नमालावचनात् आ-घटः, तस्य रलयोरैक्यात् लम्भः-प्राप्तिः, तं आलम्भं स्वप्ने कुम्भप्राप्तिं 'या' स्त्री आर-प्राप गता वा, यत्तदोर्नित्यसम्बन्धात् तस्याः ईश्वरः-प्राणेश्वरः, स्वयमात्मना, दरिद्रो-निःस्वो, न स्यात् किन्तु धनवानेव स्यादित्यर्थः। तस्या ईश्वरः किंवि० ? अगति-कुटिलं गच्छति क्विपि अग्। नकारस्य निषेधार्थत्वात् न अग्-अकुटिलः-सरल इत्यर्थः। ईश्वरः पुनः किंवि० ? अस्ता, अः-कृष्णः, उपलक्षणत्वात् चक्रवर्त्यादिः। तद्वन् स्तनति-साहसिकतया राजसभायां वदति क्विपि अस्ता। आलम्भं किंवि० ? कस्य-आत्मनः, थो-भीत्राणं यस्मात् स कथः, तं कथं-आत्मनो निरुपद्रवताकारकमित्यर्थः। या स्त्री किंवि० ? ई-लक्ष्मीतुल्येत्यर्थः, सर्वगुणोपेतत्वात् ॥९९॥

कुम्भं वर्णयित्वा सरो वर्णयति—

परिग्रहारम्भमग्नाऽस्तारये युः कथं परान् ।
स्वयं दरिद्रो ! न परमीश्वरी कर्तुमीश्वरः ॥१००॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—शसयोरैक्यात् स्-व्यञ्जनसकारं अवति-रक्षति क्विपि सूः, ईदृश अरस्शब्दो यत्र सः स्वरस्, प्रथमायां सर इति सिद्धम्। ततः तस्य सम्बो० हे स्वरः–हे सरः !। ग्रहशब्दे आ-आकारस्तस्य रलयोरैक्यात् लम्भः–प्राप्तिर्यत्र स ग्रहालम्भः, कोऽर्थः? ग्रहशब्दस्य आकारे कृते ग्राह इतिसिद्धम्। ततः परि-समन्तात्, ग्रहालम्भाः–ग्राहाः जलजन्तुविशेषा इत्यर्थः। तेषां भावे क्तप्रत्यये मग्नं–मज्जनं, उपलक्षणत्वादुन्मज्जनं च यत्र तत्परिग्रहालम्भमग्नं, तस्य सम्बो० हे परिग्रहालम्भमग्न !। असते–दीप्यते क्विपि आः–दीप्यमाना, ता–श्रीर्यत्र यस्य वा तत् अस्तं, तस्य सम्बो० हे अस्त !। रं–तीव्रं, न रं–अरं शीतलमित्यर्थः। ईदृशं 'यमंभसी 'ति महीपवचनात् यं–जलं यत्र तत् अरयं, तस्य सम्बो० हे अरय !। अथवा ता–लक्ष्मीः, तस्याः रलयोरैक्यात् आलयाः–मन्दिराणि कमलानि यत्र तत् तालयं, तत्सम्बो० हे–तालय !। 'कमलेन्दिरा हरिप्रिया पद्मवासे 'तिवचनात् पद्मायाः मन्दिराणि कमलानि भवन्ति, तानि च सरसि भवन्तीति भावार्थः। 'आ' इति स्मृतौ, 'ई' इति सम्बोधनेऽव्ययः। रलयोरैक्यात् दलानि–पत्राणि विद्यन्ते येषां ते दलिनः–पत्रवन्तः, ईदृशा द्रवो–द्रुमा यत्र तत् दलिद्रु, तत्सम्बो० हे दलिद्रो !। सरसि सलिलं भवति तद्योगात् वृक्षाः पत्रपुष्पादियुक्ता भवन्तीति भावार्थः। त्वं कार्ये कारणोपचारात् परान्–उत्तमान् उत्तमपुरुषानित्यर्थः, कर्तुं–जनयितुं परं–प्रकृष्टं वर्तसे इत्यर्थः। कोऽर्थः? स्वप्ने सरसि वीक्षिते प्राय उत्तमपुरुषा एव गर्भे पुत्रतयोत्पद्यन्ते। तत ईदृशं सरोऽस्तीति भावार्थः। त्वं किंविशिष्टं? युः। 'ईकारोऽब्जदले लक्ष्म्या 'मिति नानार्थरत्नमालावचनात् ईशब्देन अब्जदलानि, तान्येव 'उकारः क्षत्रिये नेत्र' इति नानार्थरत्नमाला-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनात् उशब्देन नेत्राणि यस्य तत् युः । कोऽर्थः ? सरसि कमल-दलानि भवन्ति, तानि तस्य नेत्रतुल्यानि भवन्तीति भावार्थः । चित्रत्वाद्विसर्गाभावः । त्वं पुनः किंविशिष्टं ? कस्य–पानीयस्य, 'थः पुंस्यूर्मिगिरीन्दु 'ष्विति नानार्थरत्नमालावचनात् थाः–उर्मयो यत्र तत् कथम् । त्वं पुनः किंवि०? 'ईकारोऽब्जदले लक्ष्म्या'मितिनानार्थ-रत्नमालावचनात् ई–अब्जदलं, तत्र शु–शोभनाः रलयोरैक्यात् अलिनो–भृङ्गा यत्र ईश्वलि । कोऽर्थः ? सरसि कमलानि भवन्ति, तेषु च दलानि, तेषु भृङ्गा भवन्तीति भावार्थः । 'ई' प्रत्यक्षेऽव्ययः 'ई' पादपूरणे च । सुवत् शुशब्दोऽपि तालव्यान्तोऽस्ति 'शुनासीर' इत्यादौ दृश्यते च ॥१००॥

सरो वर्णयित्वा सागरं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥१०१॥**

व्याख्या—'उशब्दः शङ्करे तोये तोयधौ धरणीधर' इति विश्वशम्भुवचनात् ई–श्रीः, तया युक्तः उः–समुद्रः, स युः–श्रीसमुद्रः । 'तारो निर्मलमौक्तिक' इत्यनेकार्थवचनात् ताराणां–निर्मलमौक्तिकानां, ई–लक्ष्मीः, तया तारया–निर्मलमौक्तिकलक्ष्म्या, परान्–अन्यान्, ईश्वरीकर्तुं,–श्रीपतीकर्तुं, ईश्वरः–प्रभुर्वर्तते । युः–श्रीसमुद्रः किंवि० ? न दरिद्रः–नकारस्य निषेधार्थत्वात् अदरिद्रः–श्रीमानित्यर्थः, लक्ष्मीजनकत्वात् । युः पुनः किंवि० ? कस्य–पानीयस्य 'थः पुंस्यूर्मिगिरीन्दुष्वि 'तिनानार्थरत्नमालावचनात् थः–उर्मिः, तं कथं–पानीयकल्लोलं प्रति शसयोरैक्यात् 'टोश्वि गतिवृद्ध्यो'रिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वयन्–गत्यर्थानां प्राप्त्यर्थात् प्राप्नुवन् । कथं किंवि० ? परं–श्रेष्ठमित्यर्थः । अथवा 'टोश्वि गतिवृद्ध्यो'रिति शतरि शसयोरैक्याच्च स्वयन्–व्रजन् 'परो दूरान्यश्रेष्ठशत्रु'ष्वनेकार्थवचनात् परं–दूरं यावत् स्वयन्–गच्छन्नित्यर्थः, काय–सुखाय थः–कल्लोलो यथा स्यात्तथा । कथमिति क्रियाविशेषणम् । परान् किंवि० ? परिग्रहो–धनधान्यादिः, आरम्भः–कृष्यादिः, तत्र मग्नाः–महालोभवशात् निमग्नाः, तान् परिग्रहारम्भमग्नान् । चित्रत्वादनुस्वाराभावः । 'ई' इत्यव्ययः प्रत्यक्षे ॥१०१॥

सागरं वर्णयित्वा विमानं वर्णयति—

**परिग्रहारम्भ ! मग्नास्ताऽरये युः कथं प ! रान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥१०२॥**

व्याख्या–ई–श्रीः, तया युक्ता या ऋ–देवमाता, तस्या युः–श्रीदेवमातुः–कार्ये कारणोपचारात् देवानां, रलयोरैक्यात् आलयो–निलयः विमानः, तस्य सम्बो० हे युः आलय–हे विमान ! । परिग्रहाः–दाराः, तेषु असते–दीप्यते क्विपि परिग्रहाः, ईदृशी रम्भा–स्वर्गस्त्री यत्र सः परिग्रहारम्भः, तस्य सम्बो० हे परिग्रहारम्भ ! । 'पः पाने पवने पथि प्रौढे चे'ति सुधाकलशवचनात् पः-प्रौढः विस्तीर्णः, तस्य सम्बो० हे प–हे प्रौढ ! । 'मस्जोंत् शुद्धा'विति मग्ना–शुद्धा लक्षणया निर्मला, ईदृशी तथा असते–दीप्यते क्विपि आः–दीप्यमाना, ईदृशी ता–श्रीर्यस्य सः मग्नास्तः, तस्य सम्बो० हे मग्नास्त ! । 'अरं चक्राङ्गे शीघ्रशीघ्रगयो'रित्यनेकार्थवचनात् अरं शीघ्रं यातीति ड-प्रत्यये अरयः–शीघ्रगः, तस्य सम्बो० हे अरय ! । ई इति सम्बोध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेऽव्ययः । भवान् 'अः कृष्ण' इतिवचनात् कार्ये कारणोपचारात् ईकर्तुं-कृष्णीकर्तुं उपलक्षणत्वात् बलदेवादिकर्तुं ईश्वरोऽस्ति—विभुरस्तीत्यर्थः । भवान् किं कुर्वन् ? कं—सुखं तथा थो-भीत्राणं समाहारद्वन्द्वे कथं—सुखभीत्राणं 'राङ्क् दाने 'शतरि रान्—ददृदित्यर्थः । कथं किंवि०? स्वस्मिन् यातीति डप्रत्यये स्वयः, तत् स्वयं—आत्मगमित्यर्थः। भवान् पुनः किंवि० ? नदरिद्रः—नकारस्य निषेधार्थत्वत् अदरिद्रः—श्रीमानित्यर्थः, रत्नादिमयत्वात् । ईयते—गच्छति क्विपि ईर्गच्छन्, शसयोरैक्यात् स्वरः—देवदुन्दुभ्यादिशब्दो विद्यतेऽस्मिन्निति ईस्वरी । कथं परं—दूरं यावत् 'परो दूरान्यश्रेष्ठशत्रु'ष्वितिवचनात् दूरगामि—देवदुन्दुभिस्वरसंयुक्तः देवानां आलय इत्यर्थः ॥१०२॥

द्वादशे स्वप्ने विमानं वर्णितम् । 'सागर-विमाण-भवण-रयणुच्चय-सिहिं चे'तिवचनात् क्वचित् पुनस्तत्रैव भवनमप्यस्तीति तदेव वर्ण्यते—

**परिग्रहाऽऽलम्भमग्नास्ताऽऽऽलये युः कथं प ! रान् ।**
**स्व ! यं दरिद्रो न परमीश्वरी कर्तुमीश्वरः ॥१०३॥**

व्याख्या—रलयोरैक्यात् आलयो—भवनं, तस्य सम्बो० हे आलय—हे भवन ! । पः—प्रौढः, विस्तीर्णत्वात्, तस्य सम्बो० हे प—हे प्रौढ ! । 'इ'इत्यामन्त्रणे । सु—शोभना, आ—श्रीर्यस्य यस्मिन् वा सः स्वः, तस्य सम्बो० हे स्व ! । यं भवन्तं कर्तुं—निर्मातुं प्रारब्धुं वा, दरिद्रः पुमान् ईश्वरो—विभुर्न स्यात् । यं किंवि०? परिग्रहः—परिकरः दारा वा, तथा आ-श्रीः, एषां रलयोरैक्यात् लम्भः-प्राप्तिर्यस्मिन् स परिग्रहालम्भः, तं परिग्रहालम्भम् । यं पुनः किंवि० ? परं—श्रेष्ठं, यत्तदोर्नित्यसम्बन्धात् हे आलय ! स भवान् ई—श्रीः, तया युक्ता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'ऋ पृथिव्यां देवमातरी'ति महीपवचनात् ऋ–पृथिवी, तस्याः युः–श्रीपृथिव्या इत्यर्थः । कस्य–आत्मनः, थो–भारः, ' थो भवेद् भयरक्षणे भूधरे च तथा भारे ' इति सुधाकलशवचनात् तं कथं–आत्मभारं 'राङ्क दाने'शतरि रान्–ददद्दित्यर्थः । आस्त–आस्ते स्मेत्यर्थः । स भवान् किंवि० ? अकं–दुःखं करोति णिजि क्विपि अग्–दुःखकृत्, नकारस्य निषेधार्थत्वात् न अग्–अदुःखकृदित्यर्थः–सुखकृदिति भावार्थः । स भवान् पुनः किंवि० ? ईश्वरो-नाथो विद्यतेऽस्येति ईश्वरी–सनाथः इत्यर्थः ॥१०३॥

द्वादशं स्वप्नं व्यावर्ण्य रत्नोच्चयं वर्णयति—

**परिग्रहारम्भमग्नाऽस्तारये ! युः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरी कर्तुमी श्वरः ॥१०४॥**

व्याख्या–ग्–व्यञ्जनगकारस्तत्र तस्य वा, रं–रेफं हन्ति–विनाशयति डप्रत्यये ग्रहः, ईदृशः चित्रत्वादनुस्वाराभावे अरभशब्दो यत्र सः ग्रहारभ 'गरभ' इतिशब्दः सिद्धः । 'गरभस्तु गर्भो भ्रूण' इत्यभिधानचिन्तामणिवचनात् गरभः–गर्भ इत्यर्थः । तथा मं–मकारं अजति–वर्णक्रमात् गच्छति यः स मग् यकारः इत्यर्थः । तेन युक्तो यः नो–नकारः, तत्र अस्त शब्दो यत्र स मग्नास्तः ' न्यस्त ' इति जातं'परिर्भूमि'रित्युणादिवचनात् परिः-पृथ्वी, तस्याः यो ग्रहारभः–प्रागुक्तव्युत्पत्त्या गर्भः रत्नरूपः'सर्वंसहा रत्नगर्भेतिवचनान् तस्य यः मग्नास्ता–प्रागुक्तयुक्त्या न्यस्ता-भूमौ स्थापिता, ईदृशी रलयोरैक्यात् आलिः–श्रेणिः सा परिग्रहारम्भमग्नास्तालिः–पृथ्वीगर्भन्यस्तश्रेणिः, तस्याः सम्बो० हे परिग्रहारभमग्नास्ताले–हे रत्नोच्चय ! । तथा 'आ श्रि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या'मिति शिलोञ्छवचनात् आ-श्रीः, तस्याः सम्बोधने हे ए-लक्ष्मी-तुल्ये ! । कस्याः ? ई-श्रीः, तया युक्ता या 'ऋ पृथिव्यां देवमातरी'ति-महीपवचनात् ऋ-पृथ्वी, तस्याः युः-श्रीभूमेः श्रीजगत इत्यर्थः । कोऽर्थः ? रत्नश्रेणिरेव जगतो लक्ष्मीरित्यर्थः । त्वं शसयोरैक्यात् स्वः-स्वर्गस्य, ई-लक्ष्मीः कथं अ-नाऽसि, अपितु लक्ष्मीरसीत्यर्थः । वृहन्न्यासे चतुर्दश स्वरा निषेधार्थे प्रोक्ताः सन्ति । ततः अकारः नेत्य-र्थवाचक इत्यर्थः । त्वं किंवि०? परान् उत्तमान्-उत्तमपुरुषान् । यद्वा पाः-प्रौढाश्च ते रा-नराश्च पराः तान् परान्-प्रौढनरान् कर्तु-कार्ये कारणो-पचारात जनयितुं ईश्वरी समर्थेत्यर्थः । त्वं पुनः किंवि० ? स्वयमा-त्मना । न दरिद्रा-नकारस्य निषेधार्थत्वात् अदरिद्रा श्रीमतीत्यर्थः । परं-केवलं श्रेष्ठं वा, क्रियाविशेषणत्वान्नपुंसकत्वम् 'उ'इत्यामन्त्र-णेऽव्ययः ॥१०४॥

त्रयोदशं स्वप्नं वर्णयित्वा चतुर्दशं वर्णयति—

**परिग्रहारम्भमग्नास्तारये युः कथं प ! रान् ।**
**स्वयं दरिद्रो ! न परमीश्वरीकर्तुमीश्वरः ॥१०५॥**

व्याख्या—परिग्रहेषु-दारेषु असन्ते-दीप्यन्ते क्विपि परिग्र-हासः, ईदृशयः रम्भा-अप्सरसो येषां ते परिग्रहारम्भाः-देवाः, तेषां मग्नं-भावे क्तप्रत्यये मज्जनं-स्नानं तस्मै, तथा आस्ते-उपविशति क्विपि आः तद्भावः आस्ता-उपवेशनं तस्यै, रलयोरैक्यात् आलयो-वसतिर्यः सः, तस्य सम्बो० हे परिग्रहारम्भमग्नास्तालय ! । 'इ' इत्यामन्त्रणे । देवा हि वह्नौ वसन्तीति शैवमतम् । ततो देवानां स्नानायाऽवस्थानाय च वह्निः वसतिः (हे वसते ! ) ई-श्रीः, तया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्ता ऋ–देवमाता, तस्याः युः–श्रीदेवमातृतः हे प–हे प्रौढ!। देवमाता हि देवान् जनयतीत्येको गुणः, वह्निस्तु स्वप्रविष्टानां देवत्वकरणात् देवीभूतानां वाऽऽश्रयदानात् परिपालनाद्यनेकगुणश्रेणिकरणाच्च देवमातृतोऽपि प्रौढ इति । ' रः तीक्ष्णे वैश्वानरे ' इतिवचनात् रो–वह्निः, तस्य सम्बो० हे र–हे वह्ने!। दरो–भयं विद्यते येषां ते दरिणः–भययुक्ता, ईदृशा द्रवो–द्रुमा यस्मात् स दरिद्रुः, तस्य सम्बो० हे दरिद्रो ! त्वं परं–अन्य, शुभाध्यवसायवशात् परं–श्रेष्ठं वा, रो–मर्त्यः, न रो अरः–अमर्त्यः, शु–शोभनः, अरः श्वरः–शोभनसुर इत्यर्थः । श्वरीकर्तुं–शोभनसुरीकर्तुं ईश्वरो–विभुरसि । वह्नौ प्रविष्टोऽपि कश्चिज्जीवो शुभाध्यवसायवशाद्देवो भवति । यदुक्तं च–'रज्जुग्गह-विसभक्खण-जल-जलणपवेस-तण्ह-छुहदुहओ । गिरिसिरपडणाउ मया सुहभावा हुंति वंतरिया ॥१॥ इति । त्वं पुनः किंवि० ? 'अः कृष्णे विनतासूना'विति महीपवचनात् अः–गरुडः, स इवाचरति शतरि अन्–गरुडतुल्यः पीतत्वात् त्रस (तत्रसं) गतिकत्वाद्वा । परं किंवि० ? स्वस्मिन्–आत्मनि याति–गच्छति डप्रत्यये स्वयः, तं स्वयं–आत्मगं–आत्मप्राप्तमित्यर्थः । 'ई' इत्यव्ययः पादपूरणे ॥१०५॥

अथाऽन्त्यमङ्गलार्थं कविः स्वगुरुं श्रीबुद्धिसागरनामानं वर्णयति–

**परिग्रहारम्भमग्नास्ताऽऽर येयुः कथं परान् ।**
**स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥१०६॥**

व्याख्या—श्रीकल्याणमन्दिरस्तोत्रस्य–'त्रायस्व देव ! करुणाह्रद ! मां पुनीहि' इत्यादि पदस्य विभ्रमव्याख्याने ईशब्दो बुद्धिवाचकोऽस्ति । ततः ई–बुद्धिः, तस्याः ' उशब्दः शङ्करे तोये तोयधौ धरणी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्वर ' इति विश्वशम्भुवचनात् उः–सागरः, स युः–बुद्धिसागरः इत्यर्थः । तथा याशब्दः श्रीपर्यायः । ततः यां–श्रियं, ईयते–गच्छति क्विपि येः–श्रीयुक्तः इत्यर्थः । येश्चासौ युश्च येयुः–श्रीबुद्धिसागरः । चित्रत्वाद्विसर्गाभावे नः–अस्मान् ' पलं मांसं पलं मानं पलो मूर्खः पला तुले'त्यनेकार्थध्वनिमञ्जरीवचनात् रलयोरैक्याच्च पलान्–मूर्खान् तथा चकाराध्याहारात् परिग्रहारम्भमग्नान् चित्रत्वादनुस्वाराभावे रलयोरैक्यात् ' अली भूषा–पर्याप्ति–निवारणेषु ' इति वचनात् परोक्षायां च आल–निवारयामास । कोऽर्थः ? परिग्रहारम्भमग्नता-निवारणेन दीक्षागुरुः, तथा मूर्खतानिवारणेन ज्ञानगुरुश्चायं कवेरि-त्याशयः । येयुः किंवि० ? ' ता महीलक्ष्म्यो ' रितिमहीपवचनात् ता–पृथ्वीतुल्यः, सर्वंसहत्वात् । येयुः पुनः किंवि० ? दरिद्रः–पङ्क्तिरथन्यायात् अकिञ्चनः–निर्ग्रन्थ इत्यर्थः । येयुः पुनः किंवि-शिष्टः ? परं–अन्यं, रलयोरैक्यात् पलं–मूर्खं वा ' ईकारोऽब्जदले लक्ष्म्यां वाण्या'मिति नानार्थरत्नमालावचनात् ई–वाग् इत्यर्थः, तस्या ईश्वरः–पतिः स ईश्वरो–वाग्पतिरित्यर्थः । अवागीश्वरं ईश्वरी कर्तुं–वागीश्वरीकर्तुं ईश्वरो–विभुरित्यर्थः । परं–पलं वा किं विशिष्टं ? स्वस्मिन् याति–गच्छति डप्रत्यये स्वयः–आत्मगः, तं स्वयं । कथ-मिति सम्भवेऽव्ययः ॥१०६॥

श्रीमत्तपागच्छाधिराज–भट्टारकपुरन्दर–श्री ६ श्रीहीरविजयसू-रीश्वरराज्ये पं० कवि–कविकविचक्र–चक्रचक्रवर्तिवर्तिपण्डित–श्री ६ श्रीबुद्धिसागरगणिशिष्य–पं० श्रीमानसागरगणिकृतं समाप्तं शतार्थविवरणमिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## प्रशस्तिः ।

पाञ्चाली किल पञ्चमीगतिरियं तां सेवितुं येऽभवन् ,
पञ्च श्रीपरमेष्ठिनः प्रतिदिनं पञ्चापि पाण्डोः सुताः ।
उद्यच्छारदशीतधामधवलात्तेषां प्रसादादियं,
सम्पूर्णा समभूच्छतार्थविवृतिर्नानार्थरत्नावली ॥१॥

मेषोन्मेषवियोगाऽभावाद् भुवनेऽत्र सन्ततिः सततम् ।
वर्तिष्यते यदीया जयति सुधर्मा स गणनेता ॥२॥

तत्पट्टनिकषपट्टे सुवर्णवर्णैर्न्यधान्निजामभिधाम् ।
श्रीहीरविजयसूरिः सूरीणामग्रणीर्जयति ॥३॥

तारागणाधिपत्यं श्रयति शशी सोऽपि शार्वरीसमये ।
शशिगणनाथत्वमहो दिवानिशं श्रयति सैष गुरुः ॥४॥

स्वाङ्गसदनेऽप्यमातां स्वगुणानां नित्यमेधमानानाम् ।
वेश्मान्तरं विदधे येन श्रीविजयसेनमिषात् ॥५॥

सिंहस्य सुतः सिंहो भवेदितीवैव तद्गुणान् बिभ्रत् ।
श्रीहीरविजयसूरि–र्व्यभाद्विजयदानगुरुपट्टे ॥६॥

कुमतगदग्रस्तजनं ज्ञात्वा जिनधर्मसदऽगदं गदितुं ।
नासिक्याविव नाकात् समागतौ यत्कवेषमिषात् ॥७॥

पञ्चश्रीपरमेष्ठिनां धृतिकरं ध्यानं दधानौ सदा
पञ्चाचारपरायणौ प्रतिदिनं पञ्चाक्षनिग्राहकौ ।
जायेतां जगतीजनैकजनकौ सूत्रार्थदुग्धोदधी
तौ द्वावग्रगपूर्वगामिविजयौ श्रीहीरसेनाभिधौ ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वरिवर्ति पुरोवर्ती विद्वच्चक्रेषु चक्रवर्तीव ।
श्रीबुद्धिसागरगुरुः प्रतिभापरिभूतदेवगुरुः ॥९॥
तच्छिष्यैकभुजिष्योपमानकविमानसागराभिख्यः ।
व्याकृतवान् सुकृतार्थी शुभां शतार्थीमिमाममलाम् ॥१०॥

इति शतार्थविवरणप्रशस्तिः ॥

— समाप्तम् —

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# उद्यापनम् ।

यो गर्भगोऽपि जननीजठरे प्रभाव-
प्राग्भारपूरिततया जनवृन्दजातम् ।
शाताशिवं प्रविदधेऽनुपमो जिनेशः,
सच्छान्तिदो भवतु शान्तिजिनः सदा वः ॥१॥

इन्दुं विलोक्य दिवसे गतकान्तिभारं,
राहोर्भयं प्रतिदिनं नियतं धरन्तम् ।
ग्रस्तं च तेन विगतप्रभमाश्रितो य-
मेणः सदोदयधरं स जिनः श्रिये स्तात् ॥२॥

स शान्तिनाथो भवभीतिभेत्ता, गर्भाद्विधाता जगतोऽपि शान्तेः ।
भूयात्सदा संयममार्गदेष्टृ-शास्त्रार्थदर्शी भविनां शुभानाम् ॥३॥

अर्हन्तो ज्ञानभाजः शिवपदपटवः शाश्वताः सिद्धवर्या,
आचार्या मार्गभासः श्रुतगणनिचिताः पाठकाः संयमोत्काः ।
साधुश्रेष्ठाः सुदृष्टिर्मतिचरणयुतं सत्तपस्तन्नवैते,
सेव्याः सत्कार्यपान्था प्रतिदिनमनघा आर्हतैः शुद्धभावात् ॥४॥

सर्वैः स्तुत्यमतिश्रुतावधिमनःपर्यायसत्केवलै,
र्भेदैः संवलितं बुधैर्नतिकृतं ज्ञानं तु यत् पञ्चधा ।
नन्द्याख्यं सकलाऽऽगमान्तरगतं सर्वं समाराधितुं,
शुक्लश्रीश्रुतपञ्चमीगतमधाच्छुद्धं तपस्तच्छ्रिये ॥५॥

समग्रकर्मकल्मषक्षये पटु स्मृतं तपः,
फलोन्मुखं भवेत् तकत् विधीयते तदाश्रितम् ।
महः स्वशक्ति ऋद्धितो विचिन्त्य चेतसेत्ययं,
क्षणो व्यधायि तत् सदास्तिकाः सदा श्रयन्तु तम् ॥६॥

चैत्ये यथा स्यात् कलशाधिरोपो, भुक्तेः परं पूगफलादिदानम् ।
स्थालेऽक्षतानां च फलाधिरोप, उद्यापनं तद्वदिहास्तु सत्तपे ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# आगमोद्धारक-ग्रन्थमालाना प्रकाशनो

| | | | |
|---|---|---|---|
| १ सर्वज्ञशतक सटीक महोपा. श्री धर्मसा० | | पत्राकारे | ३-०० |
| २ सूत्रव्याख्यानविधिशतक | ,, | बुकाकारे | २-०० |
| ३ धर्मसागरग्रंथसंग्रह | ,, | ,, | २-५० |
| ४ औष्ट्रिकमतोत्सूत्रप्रदीपिका | ,, | ,, | १-०० |
| ५ तात्त्विकप्रश्नोत्तराणि | आगमोद्धारककृत | पत्राकारे | ७-५० |
| ६ आगमोद्धारककृतिसंदोह प्रथमविभाग | | ,, | ४-५० |
| ७ ,, | द्वितीयविभाग | ,, | १-८१ |
| ८ ,, | तृतीय-चतुर्थविभाग | ,, | प्रेसमां |
| ९ षोडशकना व्याख्यानो | भाग बीजो | बुकाकारे | २-७५ |
| १० प्रथम-द्वितीयविंशिकानी टीका | | ,, | प्रेसमां |
| ११ आगमोद्धारकश्रीनी श्रुतोपासना | | ,, | २-५० |
| १२ कुलकसंदोह | पूर्वाचार्यकृत | ,, | ०-७५ |
| १३ संदेहसमुच्चय | श्रीज्ञानकलशसूरिनिर्मित | ,, | ०-७५ |
| १४ जैन स्तोत्र संचय प्र. वि. | श्री पूर्वाचार्यकृत | ,, | १-०० |
| १५ ,, | द्वितीयविभाग ,, | ,, | १-५० |
| १६ ,, | तृतीयविभाग ,, | ,, | प्रेसमां |
| १७ गुरुतत्त्वप्रदीप ( उत्सूत्रकन्दकुद्दाला-परनाम ) | चिरन्तनाचार्यकृत | ,, | २-०० |
| १८ शतार्थविवरणम् | गणिवर्य श्री मानसागरजीकृत | ,, | १-०० |

प्राप्तिस्थान

१. श्री जैनानन्द-पुस्तकालय, सुरत गोपीपुरा ।

For Private And Personal Use Only